श्रमेण महता युक्तः तथा तव (?) महीतले ।।११०।।

ततो मत्स्येन्द्रनाथो (ऽ) पि ....प्राप्तं नराधिपं ।
विस्मापय(न्) जगामाशुरूपविभू (?) तिरस्कृतम् ।।१११।।

नरास्थिमानादि (नराधिप°) ततो मधी (?) पूर्णकलापभृत्
स्त्रिया (श्रिया?) कदाचि(त्) ह्यनुपातैः शुचिर्वृतः ।। ११२

महालचुमदा (?) ख्यातो घूर्णमानाक्षिमण्डलः ।
प्राद्बु शासि (प्रादुरासन्) सुरास्तस्य पौर्वां गाथामुदीरयन् ।।११३।।

[f 5b]

सो(ऽ)पि दृष्ट्वा तदाप्राप्तं तं च (तञ्च) वेषमनिन्दितम् ।
आसाविति (?) च विज्ञाय परिदध्यौ मुहूर्त्तकम् ।।११४।।

निन्दिते तत्स्वरूपेण मोहं विष्यति (?)मामयम् . (?)।
तस्मादितं (?) मोक्ष्यामि वन्दनीयश्च सर्वथा ।।११५।।

इत्युक्तो (इत्युक्त्वो)त्थाय तत्पादौ गृहीत्वा वाक्यमब्रवीत्।।
कस्त्वं मे ब्रूहि तत्त्वेन तृप्तोऽहं तव साम्प्रतम् ।।११६।।

त्वद्दर्शनमभीछन्नै (?)पये ......त्वा (?) महीमिमाम् ।
कथञ्चिदमहद्राक्षं त्वं चमेतिरस्कृतः(?) ।।११७।।

किमेतद् इति विज्ञानं नैव सक्नोमि (शक्नोमि) चिन्तयन्।
मे तव वृत्तान्तं कस्तं (कस्त्वं) प्रकृतरूपवान् ।।११८।।

इत्युक्तः सान्त्वयित्वा एनं सम्यक् पृष्टं द्विजेन ।
विविक्ते साभिधिकां (साभिषिक्तां ?) च विद्या° दत्वा
महाशयाः ।।११६।

योगित्वं प्रददौ तस्मै सम्यक् प्रोक्तेन कर्मणा ।
यदायोगामृत (तापा) स्त-पशुपाशो महा(य)तिः ।।१२०।।

तदास्य कथयामास शाम्भवं शास्त्रमुत्तमम् ।
श्रुतं मया शम्भुमुखात् शास्त्रसारं सुदुर्लभम् ।।१२१।।

कथ्यमानं महेशान्यै यच्छृणु समाहितः ।
शिवेन च समाख्यातं सच्छिष्यायेदम् उत्तमम् ।।१२२।।

मया प्रोक्तं न वक्तव्यं लोकानुग्रहकारणात् ।
त्वं चेच्छ्रुत्वा समभस्व (समभ्यस्य) शास्त्रं शाम्भवमुत्तमम् ।।१२३।।

सुमहायोगसाम्राज्यं लब्ध्वा सित्वा (जित्वा) जरामरः ।
शास्त्राणाममृतं सर्वेषां सर्वज्ञेन शिवेन च ।।१२४।।

मत्प्रणीतम(म)लं शास्त्रं तत्प्रमाणं न संशयः ।
यदि चेदप्रमाणं स्यात् शास्त्रं सर्वज्ञ (सर्वत्र) चाखिलम् ।।१२५।।

किं प्रमााणं जगत्यस्मिन् दृश्यते शास्त्रकोटिषु ।
प्रमाणं शाम्भवशास्त्रं प्रवदन्ति विपश्चितः ।।१२६।।

[f 6a]
तस्मात् ज्ञेयमिदं शास्त्रं गुरुवक्त्रात् सुदुलर्भम् ।
योगविद्याविहीनानां पशु (पशू)नामसुरात्मनाम् ।।१२७।।

बहिर्मुखानां तन्निन्दामानसानां दुरात्मनाम् ।
गुह्याचारदुहां तर्कभेदवादोपसेविनाम् ।।१२८।।

शम्भुप्रसादहीनानां तत्सपर्याविरोधिनाम् ।
न वक्तव्यमिदं शास्त्रं गोप्यं श्रीशम्भुभाषितम् ।।१२६।।

नेदं लाक्षणिकं शास्त्रं पशुधीवृद्धिगोचरम्।
गुरुप्रसादतो लभ्यं नोपहासं (नोपहास्यं) हि सात्त्विकैः ।।१३०

न संसदि वदनेनं (वदेत् एनं) सतामपि कदाचन ।
विजनेशु (विजनेषु) प्रवक्तव्यमित्याज्ञा पारमेश्वरी ।।१३१।।

तं च श्रुत्वा इदं शास्त्रं सम्यगभ्यस्य यत्नतः ।
चोलेन्द्रनाथ नामा (?) त्वं भविष्यसि योगिराट् ।।१३२।।

पुरा महा(र्णव)मध्ये तु द्वीपवर्ये महेश्वरम् ।
पप्रच्छ परमेशानी विविक्ते श्रृण्वतो तम् ।।१३३।।

तत्ते वक्षाम्यहं सर्वं सिद्धानां हितकाम्यया
तपो न सारो (ऽ)ध्ययनं न सारो
यज्ञो (ऽ) थ दानप्रचयं न सार
सम्पत्तिचय न सारो
दिव्यागमो (ऽयं) खलु सारसारः ।।१३४।।

।। इति श्री मत्स्येन्द्रसंहितायां प्रथमः पटलः ।।१।।

। । द्वितीयः पटलः । ।

[6 a] श्रीदेव्युवाच —

जय सर्वज्ञ विश्वेश त्र्यम्बकाखिलवन्दित ।
सर्वागममहाशास्त्रसारज्ञ परमेश्वरः (परमेश्वर) । ।१ । ।

भवतां कथितं शास्त्रं मया श्रीवि (मयाश्रावि) सुविस्तरात् ।
तत्रमेषु (?) चिरं शास्त्रं शाम्भवं योगसाधनम् । ।२ । ।

न च विस्तरतः प्रोक्तो इदानीं विस्तराद् वद ।
अप्रकाश्यं महाशास्त्रमित्यादौ प्रोक्तवान्स्वयम् । ।३ । ।

देशो ये (अयं) निर्जनः शान्तां (शान्तो) निराबाधो (ऽपि) दृश्यते ।
योगासारं ममाचक्ष्व तस्मादिह यथा तथा । ।४ । ।

[f 6b]
देहशुद्धिः कथं देव कथं स्यादसनक्रमः ।
प्राणायामः कथं प्रोक्तः प्रत्याहारः कथं भवेत् । ।५ । ।

कथं साधारणो योगो ध्यानयोगश्च कीदृशः ।
कथं श्रीकुण्डली (कुण्डलिनी) योगः त्रिलिङ्गार्चापि कीदृशी । ।६ । ।

कानि क्षेत्राणि देहे(ऽ)स्मिन् कानि तीर्थानि शङ्करः ।
सर्वस्नानाधिकस्नानं कः परः परमेश्वरः । ।७ । ।

कापौषध-(काप्यौषध)-प्रयोगानि किञ्चिदेव रसायनम् ।
कथं स्यात्पा(दुका)-सिद्धिर्देहसिद्धिः कथं भवेत् । ।८ । ।

वेतालसिद्धिश्च कथं कपालस्य च साधनम् ।
कथमञ्जनसिद्धिस्स्याद् यक्षिणीसिद्धिरेव च । ।९ । ।

अणिमादि (:) कथं देव योगिनीमेलनं कथम् ।
एतान्येव तथान्यानि भवता सूचितानि च ।।
तानि सर्वाणि ब्रूहि विस्तरेण महेश्वर ।।१०।।

श्रीमहेश्वरः उवाच—
श्रृणु देवि प्रवक्षामि योगशास्त्रं सुदुर्लभम् ।
येन विज्ञानमात्रेण भैरवा भोवितानि (भवितानि?) च।।११।

देहशुद्धिं प्रवक्ष्यामि तत्रादौ सर्वसिद्धये ।
न सिद्धिर्जायते तेन विना वर्षायुतैरपि ।।१२।।

तस्मात्सर्वप्रयत्नेन देहशुद्धिं समाचरेत् ।
येन सम्यगापूतात्मा सिद्धिं पारमिकां लभेत् ।।१३।।

प्रातः स्नात्वा यथा न्यायं भस्मना सलिलेन वा ।
मन्त्रस्नानं प्रकुर्बीत् तद् यथा श्रृणु पार्वति ।।१४।।

गृहीत्वा दक्षिणे हस्ते जलं चुलुकमात्रकम् ।
वामाङ्गुष्ठानामया च स्पृर्श तेन (स्पृशन्तेन) समाहितः ।।१५।।

सविन्दुकैर्भूतबीजैः पञ्चप्रणवसंयुतैः ।
प्रजपेत्सप्तधा देवि मूलमंत्रेण च त्रिधा ।।१६।।

[f 7a]
वामाङ्गुलिशिलायोगा(ज्ज)लेन सह दीपितम् ।
पातकं प्रक्षिपेद् वामे शिववजृ (वज्र)- शिलोपरि ।।१७।।

अथाचम्य त्वात्मानं दोषहत्यादिशान्तये ।
प्रोक्षयेन्मूलमन्त्रेण तत्पूतं त्रिः पिबेज्जलम् ।।१८।।

ततः स्वदेहमस्नाव्य (स्वदेहमाभाव्य) मुद्रया धेनुरूपया ।
मूर्धादिपादपर्यन्तं मुक्तशेषं पुनस्तन्मुम् ।।१९।।

परिभाव्य चिरं देवि भूतबीजैस्तथा पुनः ।
पादे गुह्ये च मौने च हृदि मू (मूर्ध्नि) सविन्दुकैः ।।२०।।

विन्यस्य व्यापयेत्पञ्चतारसम्पुटपूर्वकैः ।
प्रजपेच्च यथाशक्ति पञ्चप्रणवसम्पुटात् ।।२१।।

एवं प्रोक्तं मया देवि कर्मै तद(घ)-मर्षणम् ।
अनेन स्नानमात्रेण गताहोरात्रिपातकम् ।।२२।।

सर्वतीर्थस्थानपुण्यमाप्नुयान्नात्र संशयः ।
भस्मस्नानविधि (धिं) वक्ष्ये येन योगी मलक्षयम् ।।२३।।

लभते सर्वसिद्धीनामाधिपत्यमवाप्नुयात् ।
वामहस्ततले भस्मं गृहीत्वा परमेश्वरि ।।२४।।

संस्पृशं (संस्पृशन्) दक्षहस्तेन न्यासमेवं समाचरेत् ।
पञ्चतारं समुच्चार्य व्योमेन्द्राननबिन्दुवत् ।।२५।।

बीजमुक्तानिवृत्यं (?) ते प्रवदेच्च कलात्मने।
नमो तं देव देवेशि पादयोः परिविन्यसेत् ।।२६।।

चतुः प्रणवमुच्चार्य व्योमाम्बुशशिदृग्युतम् ।
सबिन्दुकं बीजमुक्त्वा प्रतिष्ठा शब्दमुच्चरेत् ।।२७।।

कलात्मने नमो (ऽ) न्तं च नाभौ मन्त्रं प्रविन्यसेत् ।
प्रणवत्रयमुच्चार्य कण्ठे शानलनृत् (?) स्वनैः ।।२८।।

[f 7b]
बिन्दुबीज-(स)-मुच्चार्य पुनर्विद्याकलात्मने ।
नमो तं (?) हृदि विन्यस्य पुनश्च प्रणवद्वयम् ।।२९।।

प्रोक्ता(प्रोच्य?) व्योमानलमहाभौतिकार्धेन्दुभूषितम् ।
बीजं प्रोक्ता (प्रोच्य?) महाशान्तिराद्यन्ते च कलात्मने ।।३०

नमो तं (?) विन्यसेद् वक्तो(वक्त्रे) प्रोक्ता (प्रोच्य) च प्रणवं पुनः ।
व्योम (यु)ग्मानुग्रहे................ बीजान्ते शांत्यभीतकम् ।।३१।।

पदमुक्त्वा कला ते वै चात्मवेति(?) नमः पदम् ।
मन्त्रं प्रविन्यसेत् मूर्द्धि (मूर्ध्नि) प्रतिलोमेन चैव हि ।।३२।।

एतान्येवं प्रविन्यस्येच्छान्त्यतीतादिकान् क्रमात् ।
एवं विन्यस्य मेधावी ऋष्यादीन् विन्यसेत्पुनः ।।३३।।

अथ मूर्द्धा (मूर्धा) च ऋषिरनुष्टश्ह्न्द (°रनुष्टुपश्छन्द) उच्यते ।
देवता परमेशानि देवः पशुपतिः स्वयम् ।।३४।।

ऋष्यादीनां तु विन्यस्य पुनरेव समुच्चरेत् ।
अग्निरिति वायुरिति व्योमेति जलमित्यपि ।।३५।।

त्रि मन्त्राणि च भस्मानि भस्मान्तानि पृथक् पृथक् ।
सर्वं ह वा (?) पदं प्रोक्ता (प्रोच्य) (वदेत्?) भस्मपदं पुनः ।।३६।।

मन इत्येतानि पदं च(क्षुं)षि पदमुच्चरेत् ।
भस्मानीनि पदं भूयः प्रोक्तायं(?) वाक्षरेण तु ।।३७।।

रुद्रवारं जपित्वैवं विभाव्य च करे त्रिधा ।
आद्यां चां (?) पञ्च धी क्षत्वा (?) नेमेशनाय (?) चेति च ।।३८।।

आकाशात्मने नम इति शिरस्येकं विनिक्षिपेत् ।
मं (?) तत्पदं समुच्चार्य पुरुषायानिलात्मने ।।३९।।

नमश्चेति द्वितीयांशं सविभज्य च पञ्चधा ।
पञ्चार्णाद्यैस्तथेशादिमूर्तिभिः सचतुर्थकैः ।।४०।।

ऊर्ध्वं प्रदक्षिणे दिव्ये पश्चिमे प्रमुखेषु च ।
वक्रात्मने ति नत्यं तैः (?) कर्मणे च विनिक्षिपेत् ।।४१।।

[f 8a]

पुनस्तृतीयकं चांशं प्रोक्ता पञ्चाक्षरं सुधीः ।
कुर्याद् योगी त्रिपुण्ड्राणि सर्वदुःखोपशान्तये ।।४२।।

एतदोत्येयम् उद्दिष्टं स्नानं पातकनाशनम् ।
पुण्यं पाशुपतं देवि पशुपाशविमोचनम् ।।४३।।

एवं स्नानादिसंशुद्धः प्रातः प्रातः समाहितः ।
सप्त सप्त यथा न्यायं शोषणादि समाचरेत् ।।४४।।

भां तां तं बिन्दुसंयुक्तं उच्चरन् प्रणवादिकम् ।
इडया वायुमापूर्य कुम्भकेन महेश्वरि ।।४५।।

मूलाधारे स्मरेद् बिन्दुं षड्ङ्लाकित(? षडगांलङ्कृत)- मण्डलम्
धूम्राभं मत्विलं (?) बीजं तस्य मध्ये विभावयेत् ।।४६।।

तन्मध्याद् अद्भुतं वायुं आ-पादतलमस्तकम् ।
शोषयन्तं स्वकं देहं पाप्मना सह संस्मरेत् ।।४७।।

अद्य तं रुद्रमनिलं देवि पिङ्गलया शनैः ।
प्रमुञ्चेत् पूर्ववद् बीजमुच्चरेद् भुवनेश्वरि ।।४८।।

भूयः समतनुर्भूत्वा प्राणार्णं प्रजपेच्छनैः ।
यथा शक्तिचरं ध्यायेत् सशुष्कं सकलेवरंम् ।।४९।।

सप्रक्षुत्य (सप्तकृत्व)-श्चरेदेवं शोषणं पर्वतात्मजे ।
तत स्वच्छंदये दीप्तां सुरक्तप्रभयान्वितम् ।।५०।।

ऋशानोर्मण्डलं ध्यात्वा तन्मध्ये बीजमानसम् ।
पातान्तबिन्दुसहितं ध्यायेत्तद् वर्णमध्यतः ।।५१।।

प्रादुर्भूतमहाज्वाला मण्डलोदारविग्रहम् ।
ग्रहं चित्रार्कं चिन्तयेदर्कं नाडीमार्गेण खे गतिम् ।।५२।।

प्रपूर्य कुम्भकावस्थां प्राप्य वायुं विशोषितम् ।
प्रदहेद् आत्मनो देहं एनसा साकमात्मवित् (?) । ।५३ । ।

[f 8b]
पुनर्विशोधितं प्राणमिडाचक्रेण वा त्वरन् ।
विमुच्येत् स्वस्य देहस्तु यथाशक्त्यानलं जयेत् । ।५४ । ।

पूर्वोक्तसंख्यया सम्यगाचरेद् देवि दाहनम् ।
अनेन विधिना सर्वं पातकानि दहेत् ध्रुवम् । ।५५ । ।

अग्रे देवि भ्रुवोर्मध्ये सुषिरं चन्द्रण्डलम् ।
यशोहारं समुद्दिष्टं तन्मध्यस्थं विभावयेत् । ।५६ । ।

ततस्तद् वर्णितं भूतं चैन्द्रतारसुधातनुम् ।
श्रवं सममृतं (?) शुभ्रं भावयेच्चिरमादरात् । ।५८ । ।

इडाचक्रे समापूर्य पवनं कुम्भकान्वितम् ।
तच्चन्द्रगतपीयूषधारया शीतलात्मना । ।५६ । ।

आसिञ्च्य अनलसंदिव्यं पुनर्जातं च तत्तनुम् ।
चिन्तयेत् कलुषैर्मुक्तं तेजोरूपं चिदात्मवित् । ।६० । ।

पिङ्गलायां समुत्सृज्य यथाशक्ति जपेच्च तम् ।
सप्तकृत्वस्तु कृत्यैव (कृत्वैव)- मिडापिङ्गलयोः परे । ।६१ । ।

आपूर्य कुम्भकैः प्राणं पिनाकीशं सबिन्दुकम् ।
प्रोच्चरन्तं महाशक्तिसारभूतं कलेवरम् । ।६२ । ।

सम्भावेच्छनैर्वायुं उभाभ्यां सम्यग् उत्सृजेत् ।
भूयः समतनुः स्वच्छं स्वदेहं देवतामयम् । ।६३ । ।

ध्यायेच्चिरं प्रसन्नात्मा जपेत् मन्त्राणि चैव हि ।
अनेन विधिना शुद्धदेहे स्मिनोर (?) सिद्धयः । ।६४ । ।

प्रवर्तन्ते (अ)चिरादेव चान्यथानर्थकृद् भवेत् ।
भावेन सह शुद्धश्चेत् सर्वयोगमाप्नुयात् ।।६५।।

भावहीनस्य नैवास्ति सिद्धि वर्षायुतैरपि ।
उदकुम्भसहस्त्रेण मृदाढकशतेन वा ।।६६।।

अपि वर्षसहस्त्रेण भावदुष्टो न शुध्यति ।
तस्मादेतानि देवेशि भावपूतः समाचरेत् ।
इति षण्मासतः शुद्धः सम्यग् योगं प्रिये लभेत् ।।६७।

।। इति श्रीमत्स्येन्द्रसंहितायाः (यां) द्वितीयः पटलः

। ।तृतीयः पटलः। ।

[9a] ईश्वर उवाच —

यथासतक्रमं (यथागतक्रम°) वक्ष्ये साधकानां हिताय वै ।
यदभ्यासक्रमेव(यदभ्यासक्रमेणैव) स्थिरत्वं सुकरं भवेत् । ।१। ।

समादाय शुचौ देशो ....+........+.........वस्तोत्तरं छदं (?) ।
शङ्कं च दक्षिणं (दक्षिणे) स्थाप्यं सम्यग् वामोरूमूर्ध्वनि । ।२। ।

सम-ग्रीवशिरोव(कृत्रं)ह(स्तौ) विन्यस्य चोपरि ।
आकुञ्च्य गुदमेकाग्रो वीरासनमिदं परम् । ।३। ।

अनेन आसनयोगेन योगरूढः प्रसिध्यति ।
न चाभ्यासविधौ वैतच्छेत्स्यति सर्वसिद्धये । ।४। ।

तस्यैव (तस्यैवं) दक्षिणां जङ्घां न्यसेद् वामोरूमूर्धके
कूर्मासनं तद्विज्ञेयं सर्वेद्रिवशंकरं (सर्वेन्द्रियवशं करम्) । । ।५। ।

दक्षपादं च वामोरू मूले विन्यस्य तत्पदम् ।
दक्षोरुमूलपीठार्थं कल्पयेत् सुदृढासनम् । ।६। ।

बाहुयुग्मं समुसृज्य श्वलिका(?) -सनमीरितम् ।
सर्वसिद्धिप्रदं देवि सर्वरोगविनाशनम् । ।७। ।

वामगुल्फमधः कृत्वा कृत्वोपरि च दक्षिणम् ।
गुदेनापीड्य वै जानुयुगलं परिपाल्य च । ।८। ।

वामहस्ताङ्गुलीमूले (°मूल)-मवष्टभ्य यथाबलम् ।
दक्षिणहस्ताङ्गुलीमूलैः परिवर्त्य च तत्तलौ । ।९। ।

कुरूमूलद्वये (उरूमूलद्वये) पीड्य स्थानाग्रे स्थापये(द्) दृशौ ।
कुक्कुटासनमेतद्वै मनसः स्थिरकारणम् । ।१०। ।

उरूमूलद्वयाद् अधस्तात् पादयुग्मं निधाय च ।
तयोर्मध्ये स्थिरगुद पृच्छनुचम्य (?) निश्चलः ।।११।।

तथा करतलद्वन्दं समा-(श्लि)-ष्य परस्परम् ।
उर्वोरूपरि विन्यस्य नासिकामवलोकयेत् ।।१२।।

[9b]
मयूरासनमेतद् वै सर्वव्याधिविनासनम् (°विनाशनम्)।
एतस्य बाहुयुगलं कारयेद् दण्ड-(युग्म)-वत् ।।१३।।

करद्वयतलं भूमौ पुटाकारं निधापयेत् ।
किञ्चि(द्) दानमिततनु निश्चलस्थिरमानमः (° मानसः) ।।१४।

पुरोवलोकयेद् द्वाभ्यां (स)मग्रीवः समाहितः ।
व्याघ्रासनमिदं सद्यो व्याधिघ्नं योगसिद्धिदम् ।।१५।।

वामपादम् अथोत्तानं कृत्वा दक्षोरुमण्डले ।
दक्षपादं तु वामोरौ तथाभूतं निधापयेत् ।।१६।।

उरुभ्यामुपरि स्थाप्य बाहुं त्यज्य (न्यस्य?) यथार्थतः ।
करपृष्टं दक्ष्यास्य (दक्षस्यास्य) न्यसेद् वामतलान्तरे ।।
अजु(ऋजु)ग्रीवशिरो भूत्वा तथाभूतं निधापयेत् ।।१७।।

उरूभ्यामुपरि स्थाप्य बाहुं त्यज्य(न्यस्य) यथार्थतः ।
करपृष्टं दक्ष्यास्य (दक्षस्यास्य) न्यसेद् वामतलान्तरे ।।१८a।।

ऋजुग्रीवशिरो भूत्वा नासिकामवलोकयेत् ।
तन्निमीलनं चोन्मील(न)म् कुर्यादाकुञ्च्य वै गुदम् ।।१८।।

समदेहस्थिरमतिः पद्मासनमिदं पदम् ।
सर्वयोगप्रसिद्ध्यर्थमभ्यस्तं भवति प्रिये ।।१९।।

वामजङ्घोपरि स्थाप्य दक्षजङ्घां जितेन्द्रियः ।
दक्षजङ्घाधरे वामगुल्फपार्श्वं निधापयेत् ।।२०।।

हस्तादिनाभिपर्यन्तं पद्मासनवदाचरेत् ।
विजयासनमेतद्धि सर्वसिद्धिकरं परम् ।।२१।।

उरुभ्यामुपरि स्थाप्य पादयुग्मं प्रयत्नतः ।
दक्षिणं सव्यदेशे च सव्यं दक्षिणदेशके ।।२२।।

करद्वयं पृष्ठदेशे परिवर्त्त्य प्रयत्नतः ।
पादांगुष्ठयुगं सम्यक् कराभ्यां संनिगृह्य च ।।२३।।

किञ्चिदुत्तानहृदयो नासिकामवलोकयेत् ।
दृढासनमिदं प्रोक्तं सद्यो रोगविनाशनम् ।।२४।।

[10a]
एतस्याङ्गुष्ठयोर्मूले कर्पूरे (कुर्परे) सन्निवेशयेत् ।
परिवर्त्त्य करौ स्पृष्टावङ्गुलीतल - गोपिता ।।२५।।

अङ्गुलीपृष्ठयो हेतु चिबुकं सन्निधापयेत् ।
अङ्गुष्ठौ सरलौ कृत्वा तालुमूलसमाश्रितौ ।।२६।।

धृत्वा स्थिरमना भूत्वा गृध्रासनमिदं परम् ।
सर्वदोषक्षयकरं सर्वोपद्रवनाशनम् ।।२७।।

वामगुल्फकपृष्ठे तु दक्षगुल्फं निधापयेत् ।
पातयित्वा महेशानि जानुयुग्मं महीतले ।।२८।।

उर्वोः कुर्परमाधाय कृताञ्जलिपुटौ करौ ।
कुचे चिबुकसंयोगान् नासिकाग्रं निरीक्षयेत् ।।२९।।

गरुडासनमेतद् वै सर्वसिद्धिकरं भवेत् ।
गुदेनापीड्य धरणीं पादाभ्यामपि च स्फुटम् ।।३०।।

जान्वोरू ....करौ स्थाप्यं स्थिरं देशे भवेद् दृढम्
एतद् यक्षासनं सर्वविघ्नच्छेदस्य कारणम् ।।३१।।

उरूयुग्ममूलं पीठार्थं जंघा वाश्लिष्य पार्वति ।
पादयुक्(ग्म) पश्चिमौ (?) न्यस्य पर्यंकेन दृढं तनुम् ।।३२।।

कमटी(?)मुद्रया मूले समवष्टभ्य यत्नतः ।
समदेहस्थिरो भूत्वा सिद्धासनमिदं परम् ।।३३।।

सर्वसिद्धिप्रदं देवि सर्वव्याधिविनाशनम् ।
जङ्घाभ्यामुरुयुग्मं च समाश्रित्य निपात्य च ।।३४।।

कर्पूरंस्तं भवत्कृत्वा (?) पार्श्वेनैकेन संश्रयेत् ।
एतत् प्रोक्तं मया देवि वृषभासनमुत्तमम् ।।३५।।

सर्वरोगविघातार्थं प्रोक्तमेतन्महात्मभिः ।
एषा चान्ये च बहवो ह्यासना(नि) योगसिद्धिदाः ।।३६।।

[10b]
यथाभ्यासं यथायोगं तेषामेकतरं भजेत् ।
स सिद्धे ह्यासने सम्यक् सर्वेन्द्रियवशीकरम् ।।३७।।

भविष्यति दृढकायं मनोनिश्चलता तथा ।
अभ्यस्ते नासने नैव समासीनो दिवानिशम् ।।३८।।

योगं युञ्जीत विजने निःशब्दे जन्तुवर्जिते ।
सुसमे च सुसम्पृष्ठे गन्धधूपादिवासिते ।।३९।।

शिवाश्रमे गुह्यस्थाने गृहे वापि विविक्तके ।
श्रीपरामृतसंतृप्तचेतनो नियतात्मवान् ।।४०।।

अभ्यसेदनिशं योगी सर्वसिद्ध्यर्थमादरा(त्) ।
एकाग्रमतिरव्यग्रस्तत् प्रमाण(म्) सुनिश्चयः ।।४१।।

नित्योद्युक्तः सदोत्साही गुरुवानमृताशयः ।
मृदघटादि (?) र्निशं योगी सर्वसिद्ध्यर्थमादग्रे ।।४२।।

.... विभेदेन भवेदुत्साहयोगतः
तथा भवति देहो(ऽ)यमभ्यासेन तु योगिनः ।
सहसा नाभ्यसेद् योगं शनैः सम्यक् तमाचरेत् ।।४३।।

युगपत्सेवितो दोषान् करोति बहूंस्तनौ ।
तस्मादभ्यासयोगेन शनैर्योगश्च सिद्ध्यति ।।४४।।

एककालं द्विकालं वा त्रिकालं वापि पार्वति ।
सर्वविघ्नप्रशान्त्यर्थं भूतेभ्यो बलिमाहरेत् ।
अन्यथा बहुना (बहून्) विघ्नान् कुर्वन्ति परमेश्वरि ।।४५।।

स्नानादिभिः शुद्धतनुः स्वदेहे,
विशोषदाह........वनादिकृत्वा ।
अद्यापि संततमतिः प्रवरासनानि,
संसिद्धिमेति ब (?) चिराय महेशि योगी ।।४६।।

।। इति मत्स्येन्द्रसंहितायां तृतीयः पटलः ।।

। ।चतुर्थः पटलः। ।

[f. 11a] ईश्वर उवाच —

अथातः संप्रवक्ष्यामि प्राणसंयमनक्रमम् ।
यस्मिन् सिद्धे भवेद् योगी सम्यग्योगविशेषवित् । ।१। ।

प्राणस्यैव जयो योग प्राणस्यैव जयस्तथा ।
प्राणस्यैव जया(द्) देवि सिद्धिः देवि सुदुर्लभः । ।२। ।

नाजीर्णे न रसोद्गारे न च विण्मूत्रधारणे ।
न छर्द्दि नातिसारे च नातिभूतसमन्विते। ।३। ।

नैयम्ये (?) गुरुकार्येवा (?) न चापि क्षुत्पिपासतः ।
न दंशमशकाकीर्णे न च श्वापदसेविते । ।४। ।

(न) नदीसमुद्रतीरे वा न जलाशयसन्निधौ ।
श्मशाने चैत्यवृक्षे वा न महाजनसंसदि । ।५। ।

प्राणायामं न कुर्वीत कुर्याच् चेद् व्याधिभाग्भवेत् ।
स्थितः शि(वा)श्रमे गुह्ये निःशब्दे जनवर्जिते । ।६। ।

आसनं मूलसम्पूर्णं विन्यसेन् मृगचर्मणा ।
तत्रासीनः सुखं योगी गुर्वादीन् सम्प्रणम्य च । ।७। ।

अभ्यसेदासनेनैव समासीनः समाहितः ।
रेचकः पूरकश्चैव कुम्भकश्च प्रकीर्तितः । ।८। ।

नासिकापुटम् अङ्गुल्यापीड्यैकमपरेण च ।
(उ)दर्यं रेचयेद् वायुं रेचकः स उदाहृतः । ।९। ।

बाह्येन वायुना देहं दृतिवत् पूरयेत् शुभे ।
पूरणात् पूरकः प्रोक्तः कुम्भकं च तथा श्रृणु । ।१०। ।

[f. 11b]

त (न्न) मुञ्जति न गृह्णाति वायुमन्तर्बहिः स्थितम् ।
सम्पूर्णकुम्भकवृत्ति(°वत्) तिष्ठेद् अचलः स तु कुम्भकः ।।११।।

लघुद्वादशमात्रस्तु मध्यमो द्विगुणः स्मृतः ।
त्रिगु(ण)श्चोत्तमः प्रोक्तः षद्विशं (षट्त्रिंश)त्तालमात्रकः ।।१२।।

अकारश्चैकमात्र स्याद् आकारस्तु द्विमात्मूकः (द्विमात्रकः) ।
तदेकबिन्दुर्नादाद्यस्त्रिगुणः परिकीर्तितः ।।१३।।

इत्यादि क्रमयोगेन संसिद्धात्मा दिने दिने ।
यद् यत्सुकरतामेति तत्र तत्राधिकं चरेत् ।।१४।।

मा आत्ममात्राधिकं वापि चान्यत् कुर्याद् दिने (दिने) ।
यद् यदभासतामेति न तत् पक्तो (तत्त्यक्तो ?) परिव्रजेत् ।।१५।।

शनैरभ्यासयोगेन यदा प्राणो जितो भवेत् ।
तदा विघ्नानि (चिन्हानि) दृश्यन्ते योगिनः सिद्धिसूचका ।।१६।।

प्रथमश्चिञ्चिणीनादो द्वितीयः किङ्किणीरवः ।
तृतीयं वेणुनादः स्यात् घण्टानादश्चतुर्थकः ।।१७।।

पञ्चमस्तालनादः स्याद् भृङ्गनादश्च षष्टकः ।
सप्तमं (सप्तमो) दौन्दुभं (दौन्दुभो) नाद (नादो)
भेरीनाद(स्त)थाष्टमः।।१८।।

[f. 12a]

नवमं (नवमो) मेघनादं (मेघनादश्)च दशमं
(दशमः) सागरस्वनं (सागरस्वनः) ।
स्वेदस्तु प्रथमं (प्रथमो) देवि द्वितीयं (द्वितीयो)
कण्ठ (कम्प) उच्यते ।।१९।।

तृतीयो (ऽ)द्भुतकम्पश्च चतुर्थो (ऽ) पि गलस्तथा ।
शरीरस्य ऊर्धाङ्ग मित्रं (खिन्नं) पञ्चमं (पञ्चमः) प्रकीर्तितः ।।२०।।

षष्टञ्च दूरश्रवणं च सप्तमं दूरदर्शनम् ।
दिव्याज्ञा चाष्टमं देवि नवमं खेचरी गतिः ।।२१।।

जीवन्मोक्षं च दशमं त्रिकालज्ञानमेव च ।
चिन्हान्येतानि दृश्यन्ते निर्विघ्ने सति योगिनः ।।२२।।

असम्यक् कारकस्येह विघ्नाः प्रादुर्भवन्ति च ।
हिक्का - काशस्तथाभ्यासे कर्णदन्ताक्षिवेदना ।।२३।।

वातं पित्तं सन्निपातं शूलघात्युदरामयाः ।
ग्रहणीज्वरं सम्मोहमूर्च्छातिसारसाध्वसा ।।२४।।

तस्माच्छनैर्यो जपेच्च योगी संसिद्धये चिरात् ।
तस्माद् रोगचिकित्सां तु श्रृणु देवि यथा तथा ।।२५।।

स्निग्धां यवागूमत् पूग्प्रं (?) पीत्वा तत्रैवाधारयेत् ।
चिन्तयेद् अमृतं देहे सर्वरोगापनुत्तये ।।२६।।

आग्नेयीं धारणां ध्याये(द्) योगे वायव्यवारुणौ ।
मुच्छर्यामधियाते च भूतप्रेताद्युपद्रवे ।।२७।।

प्रजपेद् वै शनै(:) प्राणं विषदोषे च दारुणे ।
सर्वरोगप्रपीडासु प्रक्षद् (?) योगी सषि (?) भवेत् ।।२८।।

पिनाकिपीठगोमेदस्तथा पावकमारुतौ ।
स........श विन्दुमद् (?) बीजमुच्यते रोगनाशनम् ।।२९।।

बीजान्ते वैद्यशब्दं च मेयो दण्डी च दण्डिनौ ।
व्योमसूनो(ऽ)ग्निजापान्तो ताशद्यो (ऽ) यं महामनुः ।।३०।।

(f 12b)
षड्दीर्घस्वरयुक्तेन बीजेन धानम् (?) उच्यते ।
प्रदृश्य (प्रदर्श्य) अमृतमुद्रां च मंत्रेण व्यापयेत् तनुः ।।३१।।

कुन्देन्दुस्फटिकामलं त्रिनयनं दिव्यामृतारं घटं,
वित्ते दक्षकरे तथेतरकरे सर्वौषधीनां रसैः ।
पूर्णं पात्रवरं दधत् स्वशि(रसा) श्रीवैद्यनाथं प्रभुं,
ध्यायन् व्याधिगणैः क्षणो न मनुजो मुक्तश्चिरं जीवति ।।३२

एवं ध्यात्वा जपेन्मंत्रं सप्तसाहस्रमादरात् ।
मुच्यते सर्वरोगैश्च तथा भूताद्युपद्रवैः ।।३३।।

अथवा अन्यप्रकारेण देवं धन्वन्तरिं स्मरेत् ।
प्रजपेत् (त)न्मनुं सर्वव्याधिपीडाविनाशनम् ।।३४।।

मनुतारान्वधोबिन्दु (?) मण्डितं बीजमीरितम् ।
दान्तो मेषोवुपीठस्थो (?) बिन्दुमन्तरये (?) पुनः ।।३५।।

त्रियुगां नाहितारादिरणुं (?) युक्तोमदान्तकृत् (?)
बीजवर्णेन पञ्चाङ्गं कारयेद् आदरेण तु ।।३६।।

श्रीमच्छारदचन्द्रकोटिसदृशं दिव्यौषधपूरितं,
पात्रं च अमृतकुम्भमध्य विदधद् दोर्भ्यां वरं चाभयम् ।
सर्वव्याधिसमुच्चयक्षयकरा पद्मसहस्रच्छदे,
व्याधिः सर्वजरापमृत्युभयहा स्याद् आशु धन्वन्तरिः ।।३७।।

एवं ध्यात्वा जपेन्मंत्रं पूर्वं सेव्यमनुत्तमम् ।
सद्यः प्रमुच्यते रोगैर्भूतिघ्नैः विघ्नसंचयैः ।।३८।।

यान्यौषधानि विद्यते व्याधिघ्नानि महेश्वरि ।
एतानि श्चाद्वदाभ्य (?) च श्रृणु नाडीविशोधनम् ।।३९।।

मूलाधारात् समुद्यन्तं सुषुम्णा परिकीर्तिता ।
इडा च पिङ्गला चैव तस्य सव्ये च दक्षिणे ।।४०

इडा तस्याः स्थिता सव्ये दक्षिणे पिङ्गला स्थिता ।
इडायां पिङ्गलायां च परतश्चन्द्रभास्करौ ।।४१।।

इडायां चन्द्रमो ज्ञेय पिङ्गलायां रविः स्मृतः ।
भावयित्वा अथ सकलं कालरात्रिदिवात्मकम् ।।४२।।

चन्द्रस्तामस इत्युक्तः सूर्यो राजस उच्यते ।
विषभागो रवेर्भागः सोमभागे(ऽ)मृतः स्मृतः ।।४३।।

[13a]
भोक्तृ-सुषुम्णा कालस्य गुह्यमेतद् उदाहृतम् ।
अन्यधमन्याः प्रोक्ताः गान्धारी हरितजिह्वका ।।४४।।

सपूषालं विकाचैव (?) यज्ञो(ऽ)स्मिन्नापि शङ्खिनी ।
कुर्द्दरीवि (?) च विद्वद्भिः प्राधान्यात् व्यापिकास्तनौ (?) ।।४५।।

काचिन् नाडी बहिर्वक्रात् या मातु (?) हृदि बुध्यते ।
पपातु तुष्टेमाप्नोति कोशे र (?) इव कल्पना ।।४६।।

मातुराहाररसजैः धातुभिः पुष्यते क्रमात् ।
गान्धारी नाम या जिह्वा पिङ्गलापार्श्ववर्तिनी ।।४७।।

उन्मुखी ब्रह्मरन्ध्रान्तं बहुशाखा समुद्यता ।
इडायाः पार्श्वगा नाडी सम्प्रोक्ता हस्तिजिह्विका ।।४८।।

बहुशाखा बहुस्कन्धा मूलात् कांतु (यातु?) मुखोन्मुखी ।
समुखालं (?) वुखौ (?) चोभे पार्श्वयोरूर्ध्वगे स्मृते ।।४९।।

कराङ्गुल्फ(गुंल्या) पर्य(न्तं) बहुशाखा समुद्यताः
यशस्विनी च दक्षस्य पादाङ्गुष्ठान्तमिष्यते ।।५०।।

बहुशाखाविभेदेन मूलाधारादधोमुखाः ।
शंङ्खिनी या महानाडी वामे चाधोमुखी स्थिता ।।५१।।

शाखोपशाखभेदेन पादाङ्गुल्यं तमीश्वरि ।
च या नाडी साधश्चोर्ध्वं च सुस्थिताः ।।५२।।

बहुशाखाविभेदेन देहं व्याप्य व्यवस्थिता ।
सरस्वती च मूलोत्था जिह्वाग्रान्तं व्यवस्थिता ।।५३।।

जया च विजया व्योमा नाभिमूले समुद्भवेत्।
अयुग्मे नेत्रकर्णान्तं कपोलं व्याप्य संस्थिता।।५४।।

सुषुम्णा दक्षे वामे च उभे (इ)डापिङ्गले स्थिते।
वामदक्षिणनासान्त शरीरे(ऽ)स्मिन् व्यवस्थिते।।५५।।

एवं देवि समारव्याता नाड्यः प्राधान्यतः शुभे।
बहुत्वाच्चैव नामानि सम्यक् वक्तुं न शक्पते।।५६।।

शाखोपशारवतां प्राप्ताः शिरा लक्षत्रयात्मकम्।
अ(सा?)र्धलक्षमिति प्राहुः शरीरार्द्धविचारकैः ।।५७।।

[13b]
तद्भाश्च (?) बहूनाहु ताभिः सर्वाभिरेव च ।
व्याप्नोति सर्वतो वायुर्येन देह प्रवर्तते ।।५८।।

देहत्रिमूलाधारे तु देहाद्यन्तसमीरणः ।
नाडीभ्यामस्तमभ्येति घ्राणतो हि षड्ङ्गुले ।।५९।।

अहोरात्रमनेन्दुभ्यां ऊर्ध्वाधो वृत्तिरिष्यते ।
वामदक्षिणनाडीभ्यां स्याद् वा दक्षिणायनम् ।।६०।।

याश्च ना(ड्याः) शरीरेऽस्मिन् माहत्यय (?) व्यवस्थिते ।
तासु सर्वासु देवेशि विचरन्ति तु वायवः ।।६१।।

प्राणोऽपानः समानश्च उदानो व्यान एव च ।
नागः कूर्मेश् चक्षकरौ (?) देवदत्तो धनञ्जयः ।।६२।।

एते नाडीसु सर्वासु वसन्ति दश वायवः ।
एतेषु वायवः पञ्च नशः (नरे?) प्राणादयः स्मृता ।।६३।।

तेषु मुख्यतरः प्राणः स्कन्धः स्या(द)धः प्रतिष्ठितः ।
आस्यनासिकयोर्मध्ये हृदये भानुमण्डले ।।६४।।

पादाङ्गुष्ठे च प्राण एतेष्वपि च तिष्ठति ।
आपाने (अपाने) मिट्पायोश्च (?) कुरु दक्षिणजानुषु ।।६५।।

जंघोदरेषु कट्यां च स्थानेष्वेतेषु तिष्ठति ।
व्यानः श्रीशक्षि(श्रोणि ?)मध्यस्थः भ्रूक (?)........
गुल्फयोर्द्वयो ।।६६।

नागादिवायवः पञ्च त्वग......दिषु (च) संस्थिता ।
दशसंख्या प्रकारादि प्राणकूर्मेति कीर्त्यते ।।६७।।

अपानवायोर्यत्कर्म विशमूत्रादिविसर्जनम् ।
देहावयवचेष्टादिः व्यानकर्मेति कीर्त्यते ।।६८।।

उदानकर्म यत् प्रोक्तं देहस्थो नयनादिकम् ।
पोषणादिः समानस्य शरीरे कर्म कीर्त्यते।।६९।।

भुक्तं सर्वरसं गात्रे व्यापयन् वह्निना सह ।
द्विसप्ततिसहस्त्रेषु नाडीमार्गेषु सञ्चरन् ।।७०।।

[14a]
समानवायुरेव एतद् देहं व्याप्य व्यवस्थितः ।
उद्गारादिगुणो यस्तु नागमेतीनि (नाग इत्येव) कीर्त्यते ।।७१।।

निमीलनादि कूर्मस्य द्रुतं च कृकलस्य च ।
देवदत्तस्य देवेशि तन्द्राकर्मेति कीर्त्यते ।।७२।।

धनञ्जयस्य शोषादि सर्वकर्मसमीकृता ।
ज्ञात्वैव वायुसंस्थानं नाडीस्थानं च यत्नतः ।।७३।।

नाडीसंशोधनं कुर्यात् यथाविधिपुरस्सरम् ।
नाडीशुद्धि (शुद्धिं) विना देवि प्राणायामो न सिध्यति।।७४।।

नाडीषु सम्यक्सिद्धास्तु (सिद्धैस्तु) सुकरं प्राणसाधनम् ।
शनैः संशोधयेन् नाडी रेचकादिविधानधित् ।।७५।।

ॐकारैर्धारणायोगैः प्राणायामैश्च भेषजैः ।
प्रशुध्यन्ते शनैर्नाड्यो योगिनो यत्नतः क्रमात् ।।७६।।

युग.....(?)(आ)श्रयेद्योगी नाडीशुद्धिं शनैश्चरेत् ।
यच्छीघ्रमभ्यसेत् सद्यस्तस्य रोगो(ऽ)भिजायतो ।।७७।।

महोदरामयछर्दिरतिसारो महाज्वरः ।
संभवन्त्यचिरेणैव जहि सम्यक् प्रवर्तनात् ।।७८।।

श्रुंठी (शुण्ठी?)कषायं सुस्निग्धं पीत्वा तदारणा-(तद्धारणा)-बलात् ।
पूर्वोक्तमन्त्रस्मरणान् मुच्यते व्याधिभिः शुभे ।।७९।।

यदभिर्व्याधिभिस्त्यक्तस्तदा प्राणे जिते तथा ।
स्वेच्छया वर्त्तते देहम् आत्मनाद्रुद्यालिष्यति ।।८०।।

यावदासनमुत्सृज्य देहो व्योम न चाश्रयेत् ।
तावद् रोगाश्च विघ्नाश्च संभविष्यन्ति अनेकधी (अनेकधा) ।।८१।।

यदा स्वदेहमुद्धृत्य योगी व्योमं समाश्रयेत् ।
तदोपसर्गास्तद् विघ्नकारका (:) न संभवन्ति हि ।।८२।।

नागाः सुरेन्द्रकन्याश्च यक्षिण्यः सिद्धकन्यकाः ।
प्रार्थयिष्यन्ति तं देवि छत्स्थ (सुस्थ?) येन भयातुराः ।।८३।।

श्रृणोति दिव्यवार्ता च दिव्यदर्शनमेव च ।
रसायनाद्यौषधं च स्वयं प्रवर्तते ।।८४।।

नृपाश्च पृथिवीदानै बहुमानैश्च पुस्करैः (पूष्करैः) ।
योगिन संप्रवर्तन्ते विघ्नार्थमितरे(ऽ)पि च ।।८५।।

यस्याज्ञा वर्तते देवि तिर्यग(म)नुनगादिषु ।
एवं प्राप्तान् महाभोगान् देवा सुषुम्णा
व्या वायुं (सुरमहीभुजाम्) ।।८६।।

तृणवद् यस्त्यजेद् योगी स परां सिद्धिमाप्नुयात् ।
यदा प्राणं स्वके देहे स्वेच्छया नायित्रु (?) क्षमः ।।८७।।

तदा सुषुम्णाव्या (°स्थ) वायुं सन्निरुद्ध्य समुत्सृजेत् ।
सुषुम्णायां च शुद्धायां शुद्धयन्ते ताश्च नाडिकाः ।।८८।।

स्वरवर्णप्रभावाः स्यात् षडाधारं च शुध्यति ।
विन (?) मूत्रश्लेष्मदोषाणां अल्पता चैव जायते ।।८९।।

निर्दोष बहुसामर्थ्यं चिराद् वर्षशतं तथा ।
इति प्राणजययुक्तो योग युञ्जन् महेश्वरि ।
कालेन महता योगं प्राप्य सिद्धिं परां व्रजेत् ।।९०।।

।। इति श्री मत्स्येन्द्रसंहितायां चतुर्थः पटलः ।।

।।पञ्चमः पटलः।।

[14b] ईश्वर उवाच—

अथ प्रत्याहरि (प्रत्याहरेत्?) चित्तं निःसृतं भोगतृष्णया ।
यतो यतो(ऽ)नुक्रमति मनश्चञ्चलमस्थिरम् ।।१।।

ततस्ततोऽनुसंगृह्य स्वात्मन्येव लयं भवेत् ।
मनोभाजिनमत्युग्रं निगृह्णीयात् पुनः पुनः ।।२।।

प्राणायामकरो (°परो?) देवि बहुधा परिधावितम् ।
यस्मिन् स्नत्वे (तत्त्वे) समासक्तं मनो यदि न तिष्ठति ।।३।।

पुनः पुनर्निगृह्यैव योगीं स्थिरतरं नयेत् ।
विषयेषु समासन्नानीन्द्रियाणि शनैः शनैः ।।४।।

संनिगृह्य निगृह्यै(वं) च मनः प्रत्याहरेत् सदा ।
मन एव महेशानि कारणं बन्धमोक्षयोः ।।५।।

तस्मात् सर्वप्रयत्नेन मनो निर्मलतां नयेत् ।
योषिद् अन्नपानेषु समुत्क्रान्तं समंततः ।।६।।

संनिगृह्य प्रयत्नेन शुद्धतत्त्वे निवेशयेत् ।
संन्निरुध्य मनो देवि प्रयत्नान् नैव (एव) तिष्ठति ।।७।।

आकृष्याकृष्य यत्नेन तन्मनो वशमानयेत् ।
मनसो विजयो योगो मनसो विजयस्तपः ।।८।।

मनसो विजयो ज्ञानं तस्मात्प्रत्याहरेन् मनः ।
इन्द्रियाणि च सर्वाणि शनैः प्रत्याहरेत् सुधीः ।।९।।

श्रोत्रमाकाशम् ईशानि शब्दतन्मात्रलक्षणम् ।
व्योम्नै (व्योम्नि) च तत् समाधाय तत्कर्म च समाहरेत् ।।१०।।

त्वक्त (त्वक्?) वायुमयं देवि स्पर्शतन्मात्रलक्षणम् ।
तत्समावेश्य पवने तत्कर्म समतिक्रमेत् ।।११।।

चक्षुस्तेजोमयं विद्यात् रूपतन्मात्रलक्षणम् ।
तत् तेजसि समाधाय तस्य कर्म च संहरेत् ।।१२।।

जिह्वा वायोमयी (वारिमयी) देवि रसं तन्मात्रलक्षणम् ।
तामस्मिन् संतिवेश्यैव (संन्निवेश्यैव) तत्कर्म परिसंहरेत् ।।१३।।

घ्राणं महीमयं विद्याद् गन्धं तन्मात्रलक्षणम् ।
तत्समावेश्यैव तत्रैव तत्कर्महरणं चरेत् ।।१४।।

वाक्पाणिपादत्रयं (त्रितयं) पायूपस्थद्वयं क्रमात् ।
एतद् भूतेषु संवेश्य तत्कर्म (परि)संहरेत् ।।१५।।

यदा यदा मनो देवि चेन्द्रियाणि च कर्मसु ।
समुत्क्र(त्क्रा)मन्ति हृष्यन्ति महेशानि तदा तदा ।।१६।।

संनिगृह्य स्थिरीकुर्यात् इन्द्रियाणि मनस्तथा ।
यदा निश्चलतामेति मनः सर्वेन्द्रियैः सह ।
शनैरभ्यासयोगेन प्रत्याहारमुपक्रमेत् ।।१७।।

।। इति श्रीमत्स्येन्द्रसंहितायां पञ्चमः पटलः ।।

।।षष्ठः पटलः।।

[15a] ईश्वर उवाच—

धारणां संप्रवक्ष्यामि येन दोषक्षयो भवेत् ।
प्राणायामं द्विषट्कत्रु (?) धारणा योगः उच्यते ।।१।।

धारणा त्रिविधा देवि तां श्रुणुश्च (श्रुणुष्व) यथाविधिः ।
आदौ प्राणं (प्राणान्) समागृह्य धारयेद् वायुधारणाम् ।।२।।

वायुधारणादाध्वस्तमहापातकशं(स)ञ्चयः ।
आग्नेयीं धारणां ध्यायेत् सर्वदोषापनुत्तये ।।३।।

अग्निमारुतसंयोगाद् वारुणाकर्मयोगतः ।
संसिद्धियोगिनो देहे चिद्गमे (चिह्नमे)तत् प्रदृश्यते ।।४।।

चल (?) वर्णप्रसादं च स्वरलाघवसौष्टक (°सौष्ठवम्) ।
आरोग्यं शीघ्रगामित्वम् अरोगत्वं च जायते ।।५।।

एवं सिद्धस्तनुर्योगी क्षुत्पिपासाविघातनीम् ।
धारयेद् वारणां भूयः अमृताख्यां महेश्वरि ।।६।।

मूर्द्धादिपादपर्यन्तं प्लावये(द)मृतां शुचि ।
संभृत्य चिन्तयेज् जीवे-अमृतप्रशनेन (°प्रथनेन) तु ।।७।।

देहं चामृतसम्पूर्णं तत् तृप्तिपरिमोदितम् ।
भावयेदनिशं योगी जरामरणशान्तये ।।८।।

दिव्यामृतमहाध्यानधारणापूतविग्रहः ।
क्षत (क्षुत्) पिपासामहानिद्राजरारोगैर्विमुच्यते ।।९।।

षण्मासं धारयेद् यस्तु दिव्याममृतधारणाम् ।
बलीपलितनिर्मुक्तः स य़ोयो (योगी) योगभा(क्) भवेत् ।।१०

सिध्यन्ति सर्वकार्याणि वाञ्छितानि महेश्वरि ।
तत् धारणान्महेशानि दृश्यन्ते योगसिद्धयः ।।११।।

तस्मात् सर्वप्रयत्नेन धारणायोगमाचरेत् ।
शनैर्धारणया सिद्धिः धारणां च समुत्क्रमेत् ।।१२।।

प्राणायामैः दहेद् दोषं धारणाभिश्च किश्विषं (किल्विषम्) ।
सर्वैन्द्रियवशीकारः प्रत्याहारेण जायते ।।१३।।

[15b]
देवि शिरणा (शिरसा) योगं यद्धि कुर्याद् दिने दिने ।
मद्दासः सिद्धिमापन्नः तदाशक्तो (तदासक्तो) परिव्रजेत् ।।१४।।

धारणायां च सिद्धायां योगीनो यच्चेतसः ।
विघ्नार्थमभिवर्तन्ते गुह्यकाः कलिकामुकाः ।।१५।।

तस्मात् तेषां वलिं दद्यात् अभीच्छन् सिद्धिमात्मनः ।
अन्यथा वर्त्तमानस्य विघ्नं कुर्वन्ति दारुणा ।।१६।।

रोगैर्बहुविधैर्देवि समसा (तमसा)निद्रा तत्त्वथ (तत् तथा) ।
प्रतिबन्धैश्च विविधैरविश्वासैश्च जृम्भणैः ।।१७।।

तस्मात् तेषां बलिं दद्यात् यथावन् नियतात्मवान् ।
एककालं द्विकालं वा त्रिकालं वा बलिं हरेत् ।।१८।।

अर्धरात्रे विशेषेण तद् यथा श्रृणु पार्वति ।
एकान्ते विजने देशे ॠत्वा (कृत्वा) मण्डलमुत्तमम् ।।१९।।

ऐं व्यापक मं कलाय (मण्डलाय) ऐम् इत्थं सकृदर्चयेत् ।
चतुरस्त्रं महेशानि मण्डलं जस्तुमाक्षतैः (कुसुमाक्षतैः) ।।२०।।

तत्र मण्डलमाधाय साधारं पात्रमुत्तमम् ।
अर्घ्यान्नं पूर्णसलिलं सपुष्पं साक्षतं गृहे ।।२१।।

बलिं दद्याच(च्च) मन्त्रेण तर्ज्जन्या संप्रदर्शयन् ।
सर्वभूतेभ्य इत्यन्ते हं कारं सम्यगुच्चरेत् ।।२२।।

स्वार्हं तोयं महामन्त्रः तारपञ्चकसंपुटः ।
सर्वविघ्नविघातार्थं ईरितः परमेश्वरि ।।२३।।

सर्वस्यादिति भूतांश्च भूतानांश्च तर्पयेत् ।
दक्षिणे सकलान्यक्षात् यक्षकन्याश्च तर्पयेत् ।।२४।।

पश्चिमे राक्षसान् देवि तथा राक्षसयोषितः ।
उत्तरे क्षेत्रपालाश्च तत्कन्याश्च प्रतर्पयेत् ।।२५।।

[16a]
ऊर्ध्वायां दिशि देवांश्च देवकन्याश्च तर्पयेत् ।
अधस्ताद् दिशिनागांश्च नागकन्यांश्च तर्पयेत् ।।२६।।

मध्ये चराचरगुरुमांश्च भुवने सहः (सह) ।
भैरवान् योगिनीक्षेत्रनायकान् गणनानपि (गणकानपि) ।।२७।

तर्पयेतांश्च भूताद्यै भावयेदपि विष्टियं (व्यष्टितान्) ।
तत्परामृतसंतृप्तां भावयेत् सचराचरम् ।।२८।।

अनेन बलिना तृप्ताः योगिनः सिद्धिमुत्तमाम् ।
विशन्ति भूतनाथास्ते चान्यथा विघ्नयन्ति च ।।२६।।

अनेन वाञ्छिता तृप्ताः योगिनं योगसाधकम् ।
रक्षयन्ति महेशानि विघ्नमुत्सादयन्ति च
तस्मात्सर्वप्रयत्नेन बलिं दद्याद् विचक्षणाः ।।३०।।
न दान (दानै) यज्ञैर्न तपोभिरुग्धै (°ग्रै?)
न चोपवासैर्नियमैः कदाचित् ।
संसिध्य देवि शिशु(?) योगमार्गं
विना गुरुं तत्फलदानदक्षम् ।। ३१

।। इति श्रीमत्स्येन्द्रसंहितायां षष्ठः पटलः ।।

। ।सप्तमः पटलः । ।

ईश्वर उवाच—

अथातः संप्रक्ष्यामि ध्यानयोगमनुत्तमम् ।
येन विज्ञानमात्रेण योगी स्याद् ईश्वरः स्वयम् । ।१ । ।

[16b]
पूर्वोक्तोसनमभ्यस्य (पूर्वोक्तासनमभ्यस्य) समासीनो जितेन्द्रियः ।
ध्यायेत् परतरं तस्च (तत्त्वं) निश्चलेन अन्तरात्मना । ।२ । ।

सर्वविघ्ननिवृत्यर्थं पूर्वं ध्यायेन् महावपुः ।
पातालतलपादं च भूकटि (भ्रुकुटि) व्योमदेहकम् । ।३ । ।

स्वर्गादिलोकशीर्षी (°शीर्षा) च दिग् बाहुं देवताभयम् ।
आदित्यचन्द्रनयनं नक्षत्रगणभूषणम् । ।४ । ।

समुद्रवसनं व्याप्तब्रह्माण्डमद्भुतम् ।
ब्रह्मादितृणपर्यन्तं जगदेतच् चराचरम् । ।५ । ।

स्वरोमकूपकं ध्यायेत् स्वदेहं च जगन्मयम् ।
एवं ध्यायेन् महारूपं देवि चित्तस्थिराप्तये । ।६ । ।

इति प्रध्याथ (प्रध्याय) तत् सम्यक् योगिनश्चित्तवृत्तयः ।
शनै (:) निश्चलतां यात्ति दिव्यज्ञानविचिन्तनात् । ।७ । ।

एवं चित्तं स्थिरीकृत्य तं च ध्यानमुपक्रमेत् ।
ध्यायेत् स्वहृदये पद्मं शिवशक्त्यात्मकं परम् । ।८ । ।

तारकं दं (?) शक्तिर्नाम प्रासादमणिकर्णिकाम् ।
अग्निमण्डलपत्र (?)........ सूर्यमण्डलकेसरम् । ।९ । ।

सोममण्डलकिञ्जकं बालार्कयुतभास्करम् ।
नवशक्तिसमायुक्तं चिन्तयेच्चिरमात्मवित् । ।१० । ।

तन्मध्ये परमेशानं ध्यायेद् आत्मविशुद्धये ।
नील-जीमूतसंकाशं जटाबद्धमहोरगम् ।।११।।

बालेन्दुशेखरं भीमं हुङ्कारव्याप्तदिङ्मुखम् ।
खड्गमूलान् (?) नवधरं नागपाशचरं प्रभुम् ।।१२।।

कपालघंटा (?) सहितं विषार्ण (?) वरदं तथा ।
रक्ताम्बर (°अम्बरा) धरं रक्तमाल्यगन्धविभूषितम् ।।१३।।

नागाष्टकमहाहारं गर्जन्तं भयनाशनम् ।
व्याघ्रचर्मपरिधानं सिंहचर्मोत्तरच्छदम् ।।१४।।

[17a]
नूपुरछन्नहीरादिभूषणैः परिभूषितै (परिभूषिताम्) ।
सोमसूर्याग्निनयनं दंष्टा (दंष्ट्रा) तिर्यङ् महानलम् ।।१५।।

असन्तमखिलं दोषं विघ्नकोटिविभेदकम् ।
सर्वशत्रुक्षयकरं महामृत्युविनाशनम् ।।१६।।

बलीपलितदौर्भाग्यं जरारोगविनाशनम् ।
सर्वसिद्धिकरं देवं भैरवं भक्तिरक्षकम् ।।१७।।

माध्वीमदसमाघूर्ण नयनत्रयमण्डलम् ।
मदिरानन्दं चेतस्कं सर्वलोकगुरुं हरम् ।।१८।।

ध्यायेद् एकाग्रया बुध्या (बुद्धया) सर्वविघ्नसा(शा)न्तये ।
तद् वामाङ्कस्थलगतां चण्डिकां दुःखनाशिनीम् ।।१९।।

कालाभ्राजनसंकाशं (?) व.......र्ध्व शिरोरुहाम् ।
मुण्डासनमंकितां (?) ऋस्म (?) सर्पक्षं कलमंकिताम् ।।२०।।

रक्तगन्धप्रसूनाद्यौ (°प्रसूनाक्ष्यैः) भूषितां भूषणैरपि ।
षड्वक्रां (षड्वक्त्रां) द्वादशभुजां प्रतिवक्रं (°वक्त्रं) त्रिलोचनाम् ।।२१।।

व्याघ्रचर्मपरिधानां सिंहचर्मोत्तरच्छदाम् ।
वज्रोकुशधरां (वज्राङ्कुशधरां) चक्रशंखखेटत्रिशूलिनीम् ।।२२।।
कर्त्रिकादण्डमुशलवरदाभयधारिणीम् ।
भद्रां त्रिनेत्रां भक्तार्तिभञ्जिनीं चन्द्रक्षरवरो (चन्द्रशेखराम्) ।।२३।।

भक्ततापत्रयहरां कालग्रसनरूपिणीम् ।
माध्वीपूर्णकांध्रां xx नवयौवनगोचरा(म्) ।।२४।।

योगिनीगणसं(शं)मुरव्यां भैरवीं भयहारिणीम् ।
सर्वेद्रित(सर्वेप्सित)फलप्राप्तिकारणां कारणत्रयाम् ।।२५।।

एवं ध्याये (च्) चिरं देवीं योगी योगफलाप्तये ।
सर्वोपद्रवशान्त्यर्थं सर्वाभीष्टफलाप्तये ।।२६।।

[17b]
अनेन ध्यानयोगेन कालमृत्युभयादपि ।
मुच्यते परमेशांनि (परमेशानि) न मयोक्तं मृषा भवेत् ।।२७।।

अधीत्यैतन्महाध्यानः (अधीत्यैतन्महाध्यान -) त्यक्तोपद्रवसञ्चयः ।
पुनः ध्यायेन् महादेवि सर्वोपद्रवशान्तये ।।२८।।

छहंवुज (हृदम्बुज) - समासीनं बालसूर्यसूत (- सम -)- प्रभम् ।
देव्या समाश्लिष्टतनुं सुवर्णसमवर्णया ।।२९।।

भस्मोद्धूलित (द्धूलित-) सर्वयां (सर्वाङ्ग°) दधानं व्याघ्रचर्मणि ।
राणा (श्म) -शानस्थितं शान्तं त्रिनेत्रं चन्द्रशेष(रव)रम् ।।३०।।

ललाटस्थलबालेन्दुसुतादिव्यसुधास्नुतम् (स्नातम्) ।
वराभयमहाटंक मृगमुद्राधरं शिवम् ।।३१।।

अक्षस्त्रक्पुस्तकधरं प्रसन्नं परमेश्वरम् ।
महामण्डलसम्बद्धं महाफणिफणान्वितम् ।।३२।।

नवयौवनसम्पन्नं ग्रस्तं कालभयादिकम् ।
समुखं (सुमुखं) चारुसर्वाङ्गं गुप्तविज्ञानगोचरम् ।।३३।।

पशुपाशौघदलनं तारकं भयवारिधेः ।
सर्वाज्ञास्फारसामर्थ्यदायकं सर्वसिद्धिदम् ।।३४।।

एवं ध्यायेन् महादेवं सर्वदुःखोपशान्तये ।
सर्वसत्त्वप्रलयैव (प्रलयायैव?) सर्वाशासिद्धिहेतवे ।।३५।।

अथवान्यत् प्रकारेण ध्यायेद् धृतसरसीगृहे ।
शुद्धस्फटिकसंकाशं शरच्चन्द्रायुतप्रभम् ।।३६।।

अक्षमालाधरं शान्तं प्रसन्नं वरदं प्रभुम् ।
विशिष्टाभयसंयुक्तं रजताद्रिसमप्रभम् ।।३७।।

सर्वमृत्युप्रशमनं बलिपलितनाशनम् ।
दिव्यासन (दिव्यासार) महावर्षैर्वर्षमाणं समन्ततः ।।३८।।

[18a]
वसुधा वर्षपातेन (वर्षापातेन) सहसा सीतलान्मना (शीतलात्मना) ।
दुष्टृचर्मशतैर्मुस्म (?) भावयेदात्मनस्तनुम् ।।३९।।

अनेन ध्यानयोगेन मुच्यते दुःखबन्धनात् ।
सात्त्विको(ऽ)हं चरेत ध्याम (घ्यायन-) भीष्टसिद्धिमात्मनः ।।४०।।

अथवान्यत् प्रकारेण ध्यानयोगं वदामि ते ।
हृत्पद्मकर्णिकामध्ये शुद्धदीपशिखाकृतिः ।।४१।।

अङ्गुष्ठपर्वसङ्काशं कोटिसूर्यसमप्रभम् ।
कदम्बगोलकाकारं तारासूर्यमिव स्थितम् ।।४२।।

ध्यायेद् वा रश्मिभिर्ज्वालै दीप्यमानं समन्ततः ।
निरालम्बे पदे शून्यैं यत् तेज उपजायते ।।४३।।

तद् देहमभ्यासे (देहमभ्यसेन्) नित्यं योगी योगप्रसिद्धये ।
दिव्यमण्डलमध्यस्थं श्रचंत-(स्रवन्त-) ममृतद्रवम् ।।४४।।

ध्यायेत् तन्मण्डलं दिव्यं सर्वरक्तं सितं क्रमात् ।
मूर्तिध्यातं (-ध्यानं) च ते नैव क्रमेण तु समाचरेत् ।।४५।।

तत् प्रभापटलव्याप्तं शरीरं परिचिन्तयेत् ।
सोऽहमित्यादि (भा-) वेन शनैरिहमिति (शनैरहमिति) स्मरेत् ।।४६

स्वच्छगत (स्वहृद्गत-)- महाज्योति विनिर्यद् अमृतांशुभिः ।
त्रिलोकमखिलं योगी काव्यमानं विचिन्तयेत् ।।४७।।

अनेन ध्यानयोगेन योगी स्यादीश्वरः स्वयम् ।
स्वदेहं भावयेद् योगी कोटिसूर्यसमप्रभम् ।।४८।।

सम्यगात्मा विभेदेन सो(ऽ)चिराद् योगमाप्नुयात् ।
आत्मानं चिन्तयेद योगी सम्यग् ईश्वरविग्रहम् ।।४९।।

[18b]
तद्भावनातस्त्वचिरात् सिद्धिं श्रीशाम्भवीं लभेत् ।
शिवोऽहम् ममेवो (ममैवा?) - हमचिन्त्यो ऽ हमणुर्भुवः ।
एवं ध्यानविधौ ध्यायेदात्मानं विभेदतः ।।५०।।

आनन्दशीतकिरणोदय पूर्णितासां (पूर्णिताशां),
विस्तारफेनपरिरञ्जित दिव्यतोयम् ।
नानाविधिः (नानाविध-) प्रवरदैवतमत्स्यजुष्टं,
श्रीमत् सुधाविवरमस्मि बिधूतपाप्मा ।।५१।।

श्रीसद्गुरोः करुणादिकुलिश प्र(ख)ण्डन-
पापाद् रिक्तठ (?) निचये मम देहगेहे ।
....
....।।५२।।

कोटीन्दुभास्करनिभां (कोटीन्दुभास्करनिभं) परामाण्डकल्प-
माविस्मरामि परमं महदात्मरूपम् ।
विद्युत्सहस्त्ररुचिरं त्रसरेणुकल्प—
मानन्दसान्द्र (सान्द्र) परिमोहित (परिमोदित) भावगम्यम् ।।५३।।

पीयूषवारिधभीश्वरीमप्रमेयं (पीयूषवारिनिधिमीश्वरमप्रमेय-)
आ (मा ?) विस्मरामि हृदये सुमहगं (सुमहान्तं) मोहम् ।
षट्पद्मकोटरकपाटविघाटितेन
यज्ज्योतिरूर्ध्वमरयांति (°मुपयान्ति) तडिल्लतेव ।।५४।।

पीयूषरूपघनसार-सहस्त्रवृष्टिं (सहस्त्रवृष्टि-)
-र्मेघे भजामिहृदये परमात्मदीप(म्) ।
संचित् (सच्चित् -) स्वभावपरिवृंहितवीचिजाल-
स्वानन्दशीकरसमुच्चयसिक्तदेहः ।।५५।।

सद्भावगम्यविमलोत्तमचित्तवृत्ति—
— सेवासमुत्सुकजना वलिस्तिङकरीत्य (ति) ।
भूयो-(भूव्यो-) मवायु शिस्वि (?) नीरविभेदचित्त-
मेकं तदस्य जगतो विभवाय तत्त्वम् ।।५६।।

[19a]
तत्सर्वका(र)णमचिन्त्यमनन्तमाद्यं
ज्योतिर्मनोवचन-दूरगमम - स्ति संवित् ।
यद् ब्रह्मकन्दमसिलागमनालपुत्र—
मानन्दपिङ्गलसुधाजलदिव्यसारम् ।।५७।।

सिद्धयाष्टकप्रवरपत्रविराजमानं
तद्योगीभावकमलभ्रमरो (ऽ) हमस्मि ।
नित्यो(ऽ)हं निर्विकल्पो (ऽ)हं निराधारोऽहमव्ययः ।
र्गच्चिदानन्दरूपो(ऽ)हं ब्रह्मैवाहं न संशयः ।।५८।।

ब्रह्मैवाहं न संसारी मुक्तो(ऽ)हमिति भावयेत् ।
अनेन ध्यानयोगेन जीवन्मुक्तित्वमाप्नुयात ।।५६।।

यदा विकल्पाः कुटिला यान्ति विलयं शिवे ।
तदा मुल्लासविज्ञो (उल्लासविज्ञो ?)यः सर्वत्र समदर्शनः ।।६०।।

ध्यानेन लभते योगः (योगं) ध्यानैः सिद्धिं सुदुर्लभाम् ।
ध्यानेन नु जरां मृत्युं तरतीति मुषा (मृषा) तत् ।।६१।।

ध्यानयोगे भवेद्विप्रो योगिनो नियतः शिवः ।
व्याधिभिश्चोपसर्गैश्च तथा गुह्यकभृतये (°भूतके) ।।६२।।

यदा समुत्थितं विघ्नं योगी पश्यति पार्वति ।
तदा भूतबलिं दद्यात् पूर्वोक्तविधिना सुधीः ।।६३।।

पूर्वोक्तैर्जपयोगैश्च वक्ष्यमाणैश्च भेषजैः ।
दानैर्जपैस्तथा होमैः शमये(द्) विघ्नमुत्थितम् ।।६४।।

सर्गोपसर्गशान्त्यर्थं देवं मृत्युञ्जयं जपेत् ।
पञ्चस्वाना (स्नाना?)सनगतो (?) देवेशि चतुराननः ।।६५।।

[19b]
विन्दुनक्तादिमहितो (°सहितो) भृगुस्तारादिरीरितः ।
मं(त्रो) मृत्युञ्जये देवि महामृत्युविनाशनः ।।६६।।

त्रिपक्षः (विपक्षः) सर्वविघ्नानां सुमहावीरहानलः ।
मन्त्रा ते साधना प्रोक्ता प्रतिलोमेन चोच्यते ।।६७।।

पुटितः पञ्चतारेण सम्यक् सिद्धिकर (:) स्मृतः ।
दंकिनी त्रिगुणा कुर्यात् षडगं विधिपूर्वकम् ।।६८।।

ध्यानयोगं परं गुह्यं श्रृणु मे परमेश्वरि ।
ध्यानश्च त्रिविध (:) प्रोक्तः तत्कर्मणि (कर्म-) साधकः ।।

दशशतदलपद्मं कोटिचन्द्रवदाननं

करधृतवरमुद्रापाशवेदाक्षसूत्रम् ।
धृतशशधरखण्डोद्गीर्णपीयूषवर्षं,
स्तुतमिति परिभाव्य प्रोज्झते (?) मोहजालैः ।।६६।।

हृदयकमलमध्ये चन्द्रकर्पूरमुक्ता-
रजतकुमुदभासं सूक्ष्ममीशानमाद्यम् ।
स्मरति यदि स रोगै र्विघ्नजालोपसर्गं
व्रज(व्रण)दुरितभयाद् यैर्मुच्यते देवि योगी ।।७०।।

गगनजलदभासं शूल(ख)ट्वागंघण्टा —
- कुलिशवरकपालाभीति हस्तारविन्दम् ।
सकलदुरितभूतप्रेतकूष्माण्डवर्णा —
ग्रसननिरतमीशं ध्यायतः स्यादभीष्टम् ।।७१।।

[20a]
प्रजपेदष्टसाहस्रं ध्यात्वा इत्थं परमेश्वरम् ।
सर्गोपसर्गविघ्नाद्यैर्मुच्यते व्याधिभिस्तथा ।।७२।।

जपे(द्) द्वादशलक्षं तु य इमं मन्त्रमादरात् ।
वलिपलितनिर्मुक्त - अजरामरतां व्रजेत् ।।७३।।

यस्मिंस्तत्त्वे निविष्टं तु मनो निश्चलतां व्रजेत् ।
यदा तदा महेशानि ध्यानयोगमुपक्रमे(त्) ।।७४।।

ईश्वर उवाच —

समाधिं संप्रवक्ष्यामि येन योगी शिवो भवेत् ।
ध्यानसिद्धं तु यद्रूपं योगदृष्ट्या निरीक्षयेत् ।।७५।।

पुनः पुनः प्रसन्नात्मा निखिलेन तु वेनसा (चेतसा) ।
यदा यदा लयं याति रूपं तच् चेतसा सह ।।७६।।

तदा तदा योगदृशा समलक्षस्थिरं नयेत् ।
ध्यानात् सप्तगुणः कालः समाधिरभिधीयते ।।७७।।

तत्र स्थितं भावं स्वरूपेण चलिष्यति ।
पश्चत्वे (पश्यत्ये) - काग्रया बुद्धया समाधिस्थः स उच्यते ।।७८

एकाग्रतिरव्यग्रो निश्चलो निश्चलेन्द्रियः।
पश्येदात्माविभेदेन समाधिस्थ(:) सदाशिवम्।।७९।।

समाधौ दृश्यते देवि वह्निज्योतिर्महन्मह(:)।
यस्मिन् तुष्टे भवेत् सुक्तिः (मुक्तिः) समाधिस्थस्य योगिनः।।८०।।

सम्यक् समाधौ संसिद्धिं योगी योगेन च क्षणात्।
यद्य(त्) स्मरति वै रूपं तत्तत् पश्यति निश्चितम्।।८१।।

समाधौ साधिते सद्य(:)चिन्हान्येतानि पार्वति।
दृश्यन्ते योगिनो योगाः सिद्धसामान्यसाधनाः।।८२।।

आज्ञा सिद्धिश्चापल्यं बलवर्णप्रसाधनम्।
आरोग्यं व्याधिनःश(व्याधिनाशश्च) शीघ्रगामित्वमेव च।।८३।।

स्वेवया (स्वेच्छया) धारणं देहे वायोः श्रीखेचरीगणः।
देवानां दर्शनं योगी सम्यगात्मप्रदर्शनम्।।८४।।

[20b]
सर्वेन्द्रियवशीकारः सर्वज्ञत्वं च तत् क्षणात्।
त्रिकालज्ञानसामर्थ्यं ईश्वरत्वं च पार्वति।।८५।।

एते चान्ये च बहवो दृश्यन्ते योगसिद्धयः।
यदा समाधि निर्विघ्नः सिद्धिं याति यतिप्रिये।।८६।।

तदा योगी जरामृत्युकालाद्यै(:) परिमुच्यते।
सिद्धि (सिद्धी) नामाधिपत्यं च लभते नात्र संशयः।।८७।।

समाधौ यदि विघ्नानि संभवन्ति स (सभंवन्तीह) योगिनः।
तान् पूर्वोक्तप्रकारेण सम्यगुत्सार्य पार्वति।।८८।।

समाधिं साधार्यत्वैवं सनैस्त्रं (शनैस्तं) च समुत्क्रमेत्।
एतत् ते व्याहत (व्याहृतं) देवि समाधिरतिदुर्लभम्।।८९

गुरुप्रसादामृष (X) तन्निर्धृत (र्धूत)पाप्मा,
महेशयोगीशुभयोगसंस्यं (संस्थः)।
समन्यसे(समभ्यसेत्) सिद्धिमधीच्छुरेव
-मुत्सा(ह) वानात्मविदादरेण।।९०।।

।।इति श्रीमत्स्येन्द्रसंहितायां सप्तमः पटलः।।

। ।अष्टमः पटलः । ।

ईश्वर उवाच—

अथ आन्तरर्चनं (आन्तरार्चनं) वक्ष्ये सर्वसिद्धिप्रदायकम् ।
शुद्धे मनोरमे देशे सन्निविष्टः सुनिश्चितः । ।१ । ।

आत्मानं भावये(च्छु) द्धतत्त्वगोचरमीश्वरः (?) ।
ध्यात्वा चिरं प्रशंत्मा (प्रशान्तात्मा) पूर्वोक्तध्यानयोगात् । ।२ ।

पूजयेद् गन्धपुष्पाद्यैर्योगी भावमयैः शुभैः ।
षडाधारेषु विधिव(द्) द्वादशान्ते विशेषतः । ।३ । ।

पूजयेच्छम्भुमव्यग्रं सक्रा (शक्त्या)- सहितमव्ययम् ।
संस्मरन् नियतो देवि पीयूषार्णवमुत्तमम् । ।४ । ।

[21a]
सुसुखा (सुशुभ्र)स्फाटिकाभासं दिव्यकल्लोलबृंहितम् ।
तन्मध्ये विपुलं देवि रत्नं द्वीपं विभावयेत् । ।५ । ।

सर्वर्तु (सर्वत्र तु) कुसुमं हृद्यं तन्मध्ये काननं स्मरेत् ।
पारिजातैः कदम्बैश्च मन्दारैः चन्दनैः कुचैः । ।६ । ।

विल्वामलकजम्बीरचम्पकाशोकपाटलैः ।
बकुलैर्दाडिमैराम्रैः जम्बूनागवटादिभिः । ।७ । ।

स्रक्षैः (?) कुवरकैर्देवि महाखर्जूरगोस्तनैः ।
समालैर्मालतीगुल्मैः शतपत्रैश्च वंजुलैः (वनजैः) । ।८ । ।

अश्वत्थैः कर्णिकारैश्च सरलैरर्जुनैरपि ।
एतैर्वन्यैश्च विविधै र्पादपैरुपशोभितम् । ।९ । ।

मन्दमारुतसंभिन्नं कुसुमामोददिङ्मुखन् ।
तन्मध्ये भावयेद् योगीवरः सर्वगुणाधिकम् । ।१० । ।

कल्हारैर्कमलैरध्ये (अर्ध्य) पुष्पैः सौगन्धिकैः शुभैः ।
हंससारसकारण्डश्चमरैश्चक्रनाम भिः (चक्रबाकभिः) ।।११।।

अन्यैः कलकलारावैर्विहगैरुपशोभितम् ।
महासरसि तन्मध्ये पुलिने (ऽ) तिमनोहरे ।।१२।।

परितः पारिजाता (द्यं) मण्डपं परिभावयेत् ।
रत्नार्चि(त)गवाक्षा.......श्चतुर्द्वारविराजितम् ।।१३।।

रत्नीपक्ष्णाप्तं (?) संशोभि (त) कपाटाष्टकसंयुतम् ।
पताकाध्वजमालाभिः शोभितं मङ्गलाङ्कुरैः ।।१४।।

कलशैमुकुरैश्चित्रैस्तोरणैर्विविधासनैः ।
सहस्रदीपसंयुक्तं दीपदंक (?) विराजितम् ।।१५।।

वितानक्षत्रमालादामविराजितम् ।
जम्बकास्मीर (?) कस्तूरीमृगनाभितमालकैः ।।१६।।

चन्दनागर (चन्दनागुरु)-कर्पूरौ मोदितदिगम्बरं ।
पुष्पप्रकरसंकीर्णं धूपामोदसुगन्धितम् ।।१७।।

[21b]
रत्नदिर्या (रत्नदीपा) र्वुदयुतं रक्षितं सर्वदेवतैः ।
इत्थं ध्यात्वा महेशानि मंडपं (मण्डपं) परमात्मन (परमात्मनः) ।
तन्मध्ये भावयेन्मन्त्री पारिजातं सुपुष्पितम् ।।१८।।

भ्रमद् भ्रमरसंगीतं वर्षन्तं कुसुमोत्करं ।
तस्याधस्तात् स्मरेद् योगी रत्नसिंहासनं शुभम् ।।१९।।

रत्नकाञ्चनसन्दीप्तं प्रियका (?) जिनमङ्कितम् ।
दिव्यवस्त्रावृतं सौम्य तस्य मध्ये व्रजं (?) स्मरेत् ।।२०।।

तारकं शक्तितालं प्रास्मतमनुकर्णिकं (?) ।
वह्निमंडलपत्रा(क्षं) सूर्यमण्डलकेसरम् ।।२१।।

सोममण्डलकिञ्जलकं शिवशक्त्यात्मकं पदम् ।
तत्कर्णिकायामासीनं दिव्यसन्दिष्टविग्रहम् ।।२२।

प्रसन्नं वरदं सर्वं शरच्चन्द्रसमप्रभम्।
व्याघ्रचर्मपरिधानं टङ्कशूलभयान्वितम्।।२३।।

नरमुद्राधनं (°धरं) शान्तं सर्वालङ्कारमङ्कितम् ।
पद्मासनस्थितं सर्वपार्श्वगै (:) परिवारितम् ।।२४।।

सर्वज्ञाननिधि (°निधिं) देवि सर्वज्ञं परमेश्वरम् ।
समानोदितचन्द्रार्कौ (चन्द्रार्क) कोटिभानुविग्रहम् ।।२५।।

शरीरदुःखशमनं समस्ताभीष्टसाधकम् ।
सर्वमन्त्रमयं शुभ्रं सर्वयोगमयं शिवम् ।।२६।।

नवयौवनसम्पन्नं सर्वलक्षणभूषितम् ।
त.............माण्डस्थलगताम् विकामं मरार्चितम् (?) ।।२७।।

भक्ततापत्रयहरां सर्वमृत्युविनाशिनीम् ।
एवं ध्यात्वा शिवोयोगी (शिवं योगी) समावाह्यमवरुध्य च ।।२८।।

मातृकां विन्यसेद् भूयः श्रीकण्ठादीनपि स्मरेत् ।
शिवागमोक्तविन्यासैः सम्यग् विन्यस्तविग्रहः ।।२९।।

[22a]
प्रविभेदेन भविन (भावेन) पूजयेत् परमेश्वरम् ।
प्रथमं गुरु (हे)रम्बौ पूजयेद् वामदक्षकम् ।।३०।।

शास्तारमार्यं बटुकं क्षेत्रेशं च यथाक्रमम् ।
अग्निरक्षो (ऽ) निलेशान कोणेषु परिपूजयेत् ।।३१।।

नवशक्ति (°शक्ती) र्यजेष्टपत्रमध्ये तु पार्वति ।
नमो भगवते प्रोक्त (प्रोक्त्वा) भृगकोटिशता (?) अक्षरान् ।।३२।।

x x x

x x x

प्रोक्तागुणात्मशक्यं (?) ते युक्ताय पदमुच्चरेत् ।
अनन्ताय पदं धात्का (प्रोक्त्वा) योगपद्मपदं वदेत् ।।३४।।

पी(ठा)त्मने नमो तोडस्तारादिः पीठपूजने ।
आवाह्य पूर्वमन्त्रेण साङ्गं सपरिवारकम् ।।३५।।

मानसेन विधानेन भावपुष्पैः समर्चयेत् ।
तत्तदागममार्गेण योगी संपूज्य यत्नतः ।। ३६

तर्पयेद् भावसुधका (भावसुधया) नैवेद्यैर्भाविसाधितैः।
क्रुं कं च कल्पयित्वा तु भावज्वलित (°ज्वालित) पावकैः ।।३७।

जुह्वघाद्राव (जुहुयाद् ?) वरुणसमिधाद्यैश्च तद्भवैः ।
धर्माधर्म हवीर्दीप्ते आत्माग्नौ मनसाहुनेत् ।।३८।।

दत्वा पूर्णाहुतिं देवि होमकर्म समाप्य च ।
समाप्य पूजाशेषं च तत्प्रसाद पवित्रकम् ।।३९।।

पूजयेच्च यथाशक्ति दत्त्वा बलिविधिं शुभम् ।
सप्रर्यैष (सपर्यैषा) मया प्रोक्ता शांभवीभावसाधनी ।।४०।।

मानया सदृशी लोके सपर्या देवि विद्यते ।
अथान्यत्प्रकारेण (अथवान्यत्प्रकारेण) पूज्योक्ता
(पूजोक्ता) परमेश्वरि ।।४१।।

पूर्ववद् विजने देशे समासीनो जितेन्द्रिय(:) ।
ध्यायेत्तु मण्डलं पूर्वं प्रभाकिरणभास्करम् ।।४२।।

तन्मध्ये परमेशानि आत्मानं ज्योतिरुपिणम् ।
निर्वातस्थो यथा द्वीपस्तथा निश्चलविग्रहम् ।।४३।।

[22b]
कोटिसूर्यप्रतीकाशं ज्वलन्तममृतं शुभः ।
स्मरेत्तदविभेदेन स्वरक्षां तन्मयं शनैः ।।४४।।

समस्तदेवता पुञ्जपञ्जरं गुणरञ्जितम् ।
ध्यात्वेत्थं पूजयेदेकं भावपुष्पामृतादिभिः ।।४५।।

तदैव जु(हुयात्) योगी हविभिर्भावसाधिभिः ।
एवमाराधयन् शम्भुमात्मरूपमकल्मषम् ।।४६।।

योगसाम्राज्यसम्पद्भिर्युज्यते सो(ऽ)चिरादेव ।
अथान्तरसपर्यायामन्तरायो (न ?) भविष्यति ।।४७।।

भावसिद्धेन बलिना तद्भोगैस्तस्य तर्पणैः।
शमयोग्रसंयातं (शमेयेद् ?) उपसर्गाच्च दारुणात् ।।४८।।

मूलाधारे तडिद्वर्णं भा भासितदिगन्तरम् ।
बालसूर्यसहस्राभं सुशुद्धं गुण- (अ)वर्जितम् ।।४९।।

स्वशक्तिविधृतं देवि समासीनमनुपमम् ।
पूर्ववद् भावसुधया संतर्प्य परिपूजयेत् ।।५०।।

भावारव्यचरणा होमः कर्त्तव्यस्तत्र योगिनः ।
एवं सम्पूजयन् योगी वत्सरात्सिद्धिमाप्नुयात् ।।५१।।

सर्वज्ञां सारसामर्थ्यां देवैरपि सुदर्लभाम् ।
षट्दलकमले देवि स्वादिष्टाने (स्वाधिष्ठाने) महेश्वरम् ।।५२।

मध्यगतं महासूर्यं किरणाभासमुच्यते ।
ज्योतिर्मण्डलमध्यस्थं भावगम्यं सुनिश्चलम् ।।५३।।

पूजयद् (पूजयन्) भावमात्रेण यः पूजयति नित्यशः ।
संसिद्धिमष्टमासेन लभते देवि दुर्लभाम् ।।५४।।

मणिधरे (मणिपूरे) महापद्मे जाम्बुनदसमप्रभाम् (?)
सें.......... रगैरिकाभासम् (?)अचञ्चलमनूपमम् ।।५५।।

मनोमयमहाद्रव्यैः पूज्यपूर्वोक्तमागतः ।
षरामासाल्लभते सिद्धिं वाञ्छितां परमेश्वरि ।।५६।।

[23a]
अनाहते महापद्मे जपाकुसुमसंप्रभम्।
प्रवालाङ्कुरसंकाशं सहस्रार्कसमप्रभम् ।।५७।।

पूर्वोक्तविधिना योगी सम्पूज्य परमेश्वरि ।
यतु (चतु)र्मासादनु पाभ्पामेति (?) सिद्धिं जनप्रिये ।।५८।।

विशुद्धौ चन्द्रसंकाशं प्रभामडंलमध्यगम् ।
सुधास्तुततनुं शान्तं पूर्ववत्परिपूजयेत् ।।५९।।

स त्रिमासान् महासिद्धिं लभते देवि दुर्लभाम् ।
चन्द्रकोटिप्रतिकाशमाज्ञायां परमेश्वरि ।।६०।।

पूर्वोक्तविधानेन पूजयेद् भावसाधनैः ।
द्विमासादभिसिद्धानामाधिपत्यमनुत्तमम् ।।६१।।

द्वादंते(द्वादशान्ते) महादेवं शरच्चन्द्रार्वुदप्रभम् ।
शुद्धस्फटिकमुक्ताभं य........... त्य मणिसन्निभम् ।।६२।।

सुधावर्षं प्रवर्षन्तं सर्वयाग (°योग)फलप्रदम् ।
सुधामण्डलमध्यस्थं निश्चलं गुणवर्जितम् ।।६३।।

सर्वान्तरायव्याधिघ्नं कालग्रसनतत्परम् ।
महोपसर्गदुरितमृत्युपीडाभयापहम् ।।६४।।

सर्वरोग (सर्वारोग्य) महासम्पत् सामान्यपददायकं ।
पीयूषवर्षवर्षन्तं वलिँपलिहारिणम् ।।६५।।

अणिमादिमहासिद्धिसाधनैकतरं शिवम् ।
सर्वज्ञसिद्धिदं कालत्रयविज्ञानदायकम् ।।६६।।

सर्वसिद्धिप्रदातारं जीवन्मुक्तिपदं परम् ।
तर्पयेद् भावसुधयो (भावसुधया) भावपुष्पैश्च पूर्ववत् ।।६७।।

एवं क्रमेण यो योगी पूजयेत्परमेश्वरम् ।
मासत्रयेण सर्वासां सिद्धीनामधिपो भवेत् ।।६८।।

अजरामरतामेति वत्सरार्द्ध(र्ध)प्रयोगतः ।
आत्मानं तन्मयं ध्यात्वा सम्यगेवाविभेदतः ।।६९।।

[23b]
पूजयेन्मनसा भावकुसुमैस्तत् सुधाद्रवैः ।
अचिरेणैव कालेन स योगी योगभाक् भवेत् ।।७०।।

इत्येषा व्याहृता देवि पूजा ते परमेश्वरि ।
नानया सदृशी पूजा सर्वशास्त्रेषु दृश्यते ।।७१।।

आत्मसंस्थं परित्यज्य बहिश्च स्यं (बहिःसंस्थं) यजेच्छिवम् ।
करस्थं पायसंत्यकालिहेत्कुर्परमेव (?) सः ।।७२।।

आत्मरूपी परः शम्भु (:) जगदेतत्तदाश्रयम् ।
तस्मिन् सम्पूजनं देवि पूजितं सचराचरम् ।।७३।।

हिसांदिदोषमुक्तत्वाद् अन्तरंगविमुक्तिदम् ।
तस्मात्सर्वप्रयत्नेन शिवमतः (शिवमन्तः) समर्चयेत् ।।७४।।

पूजैषा शाम्भवी गुह्या प्राणायामादयस्तथा ।
योगश्च मन्त्रसिद्धिश्च सेध्यंतीति (सिद्धयन्तीति) सुनिश्चितम्।।७५।

अन्यथा क्लिश्यन्ते देवि न सिद्धिरुपजायते ।
असिद्धमत्रंयोगतः असिद्धिरुपजायते ।।७६।।

गुह्यका भूतवेताला व्याधयो मृत्युःवापरे ।
विघ्नयन्ति समासाद्य पीडयन्ति च योगिनम् ।।७७।।

तस्मात् सर्वप्रयत्नेन मत्रंमादौ प्रसाधयेत् ।
मत्रंसिद्धिं विना योगी योगं (न ?)प्रयुज्यते ।।७८।।

तस्य धातुगता देवि योगिनो (योगिनं) भक्षयन्ति तम् ।
भैरवे सह देवेशि ज्ञपिते (जपिते) मत्रंवर्जिते ।।७६।।

क्षणात् सिद्धिं प्रयछन्ति मन्यसिद्धस्य योगिनः ।
असम्यग् युञ्जते वापि तस्मान् मत्रंजपे सुधीः ।।८०।।

यद् यद् समीहते देवि मत्रंसिद्धि (:) प्रयोजनम् ।
तत् तदाशु लभेत् सद्यो निर्विघ्नेन सुरार्चिते ।।८१।।

[24a]
न जरामृत्युर्वा रोगा भूतायक्षाश्च गुह्यकाः ।
जपिनं नोपसर्पन्ति भयभीताः समन्ततः ।। ८२

तस्माज् जपेन् महाविद्यां योगिनीं हृदयङ्गमाम् ।
न कर्मणा साधनसंविधानै
नैवायुरोधैर्न (न वायुरोधैर्न) च पूजयांतः
न सिद्धिरुक्तापि च मन्त्रसिद्धौ ।
प्रजायते सिद्धिरतीव दिव्या ।।८३।।

।।इति मत्स्येन्द्रसंहितायाम् अष्टमः पटलः।।

।।नवमः पटलः।।

श्री ईश्वर उवाच —

अथ गुह्यं प्रवक्ष्यामि मन्त्रराजं महेश्वरि ।
यत्सिद्धौ सर्वसिद्धिं (°सिद्धिः) स्याद् योगिनो नात्र संशयः ।।१।।

मन्त्रोद्धारं (°द्धारं) प्रवक्ष्यामि सर्वसिद्धिप्रदं परम् ।
महाचमत्कारकरं महामुक्तिप्रवर्त्तकम् ।।२।।

महामृत्युप्रशमनं समाज्ञापरिकृन्तनम् ।
स्वाज्ञा संसिद्धिदं देवि जरापलितहानिदम् ।।३।।

भूतप्रेतोपसर्गादिदारणं शत्रुनाशनम् ।
चोरव्याघ्रमहासर्पपरचक्रादिवारणम् ।।४।।

त्रैलोक्यमोहनं देवि त्रिकालज्ञानदायकम् ।
अणिमादिप्रदं जीवन्मुक्तिदं खेचरप्रदम् ।।५।।

बहुनात्र किमुक्तेन जरामरणनाशनम् ।
अवर्गश्च कवर्गश्च पवर्गश्च पवर्गकं (चवर्गकम्) ।।६।।

तवर्गश्च यवर्गश्च (टवर्गश्च ?) यवर्गश्चेतिसप्तकम् ।
डाकिनी शाकिनी चैव लाकिनी काकिनी तथा ।। ७

साकिनी हाकिनी देवि यक्षिणी चेति कीर्तिता ।
सप्ताधारेषु विख्याता वर्गसप्तकं संश्रया (तु) ।।८।।

नाथसप्तकसंयुक्ता योगिन्यो (योगिनो) योगसिद्धिदा ।
तासां हृदयगोमंशे (?) सर्वमन्यप्रधानवान् ।।९।।

तं प्रोच्यमानमधुना श्रृणु योगिमन(:) प्रियम् ।
तृतीयं काकिनीवर्गा वृद्धयोदेक्षरं (वर्धयेदक्षरं) पदम् ।।१०।।

यक्षिणी द्वितीयं पश्चात् यक्षिणी तृतीयं पुनः ।
साकिनी प्रथमं देवि यक्षिणी सप्तमं ततः ।।११।।

[24b]
अष्टमं यक्षिणी वर्गाः दत (xx) परमुदीरितः (मुदीरितम्) ।
वह्नि(अं)पीठ(उ)शिखी(तफरलरं)योनि (एऐरें) मन्त्रमीरितम्।।१२।।

पुटिवं (पुटितं) प्रचतारेण(पञ्चतारेण ऊ ॠ त त्रा)
सर्वज्ञत्वं प्रदक्षणात्(?)।
दण्डविन्दुयुतै (अं) वह्निरक्षरै(अं) क्रमश सुधीः ।।१३।।

तेनैवानल वाग्विन्दु.......सद्भिः पुरोदितै (:) ।
नाभान्ते तु विशुध्यादि (विशुद्धयादि°) धामनाम समीरयेत् ।।१४।।

ज्वालामन्तं ततस्तन्तु धातु नाम क्षमीरयेत (समीरयेत्) ।
द्वितीयान्तं च रक्ष्येति (रक्षेति) युगलं प्रोच्चरे(त्) ततः ।।१५।।

पातियुक्तान्य मुन्याहु (?) षड्ङ्गानि महेश्वरि ।
कराङ्गलीषु विन्यस्येत् कनिष्ठादिषु मंत्रवित् ।।१६।।

पंचभिश्चापरेणैव तलयोस्तनुपृष्टयोः ।
हृदयादिषु च न्यस्येद् यथाविधि (:) पुरस्परं(पुरस्सरम्) ।।१७।।

मांती (मन्त्री) दण्डी बिन्दुयुग्मौ तदन्येन लवायुभिः ।
साद्यीशं(?) बिन्दुयुक्तं तु बीजयुक्तं सुदुर्लभम् ।। १८

बीजान्ते दक्षिणपदं द्वादशाङ्गाधिवासितम् ।
वरदेति सम्मुच्चार्य परमेश्वरि चेति वै ।।१९।।

परापरे पदं प्रोक्ता (प्रोक्त्वा) वदेत् परमकारणो ।
परमपदशष्टान्ते (शमान्ते) (?) विग्रहे पदमुच्चरेत् ।।२०।।

सर्वदुःखा स्पदं प्रोक्तलोहितो(ऽ) ग्निसमन्वितः ।
शमनीति पदं भूयंश्चेत्येहीति पदं ततः ।।२१।।

मत्प्राणशक्ति रक्षेति गुगुले(?) हृदये न्यसेत् ।
मशं (मन्त्र°) यमाल (?) रक्षार्थमीरितः परमेश्वरि ।।२२।।

अथ न्यासविधिं वक्ष्ये येन विन्यस्तविग्रहः ।
सर्वपातकनिर्मुक्तः सिद्धिपरमिकां लभेत् ।।२३।।

चुत्की(?) तले व्रह्मपदे भालाक्षि श्रवणे द्वये ।
सबिन्दुकै (:) मन्त्रवर्णैः पञ्चवर्णैः पञ्चसम्पुहैः (°सम्पुटैः) ।।२४।।

[25a]
विन्यसेत् परमेशानि न्यासांगकद्वये (नासिकागंद्वये) तथा ।
वदने चोष्ठयोर्देवि चुबुके (चिबुके) च न्यसेत् पुनः ।।२५।।

वक्रन्यासमिदं प्रोक्तं त्रैलोक्यक्षोभकारकम् ।
कण्ठे स्तनद्वये चांशयुगले क्क्रुदो (ककुदौ) हृदि ।।२६।।

तथा कूर्परयोः पाण्योः पाश्वयो(पार्श्वयो) र्जठरे पुनः ।
हृदयन्यासमुद्दिष्टं महापातकनाशनम् ।।२७।।

सर्वव्याधिहरं भद्रे सर्वरक्षाकरं भवेत् ।
नाभौ पृष्ठे कटियुगे गुह्ये चाण्डद्वये तथा ।।२८।।

मुले गुदे स्फिचकट्यां लिङ्गाग्रे नाभिमूलके ।
मध्यन्यासमिदं प्रोक्तं महामृत्युविनाशनम् ।।२९।।

सर्वविघ्नप्रशमनं सर्वलोकवशीकरम् ।
ऊर्वो मूले तथा मध्ये चोर्वोरग्रे तयोरधः ।।३०।।

जात्वग्रे (जान्वग्रे) जुनुमूले(जानुमूले) च जघंयोस्तु पदे तथा।
पादन्यासमिदं देवि सर्वार्थप्रतिपादकम् ।।३१।।

सर्वज्ञत्वपदं दिव्यं सर्वजीवमनोहरम् ।
ततः समस्तमन्त्रेण कान्तं पादान्तमत्मवित् ।।३२।।

पादात्कांन्तं च विन्यस्ये(द्) देवि व्यापकयोगतः ।
त्रिसन्ध्यमर्द्धरात्रे च यद् एनं स्वविग्रहे ।।३३।।

न्यसेत तदा वत्सराधिकाणिमादि गुणान्वितः ।
भविष्यति महेशानि सर्वपातकवर्जितः ।।३४।।

एवं न्यस्य (न्यसेद्) रीरो (शिरो) ध्यानेमेवं समाचरेत् ।
अमृतार्णवमध्ये तु रत्नद्वीपे मनोहरे ।।३५।।

उद्यानं भावये(द्) दिव्यं दिव्यकल्पद्रुमाश्रितम् ।
तन्मध्ये भावयेद् देवि वेरामृत (परामृत-) महानदीम् ।।३६।।

तस्याश्च प्रुलिते (पुलिने) रम्ये कदम्बवनमुत्तमम् ।
संस्मरेत् फलपुष्पार्घ्यं भ्रमद्(र)गीतसनादितम् ।।३७।।

[25b]
तत् कोटरोलितचारुशशाङ्कवर्णं
कादम्वरीवरसुधा परिमोदितासम् ।
तद्गन्धलोलुप समागतराजहंस,
सारङ्ग कोकिल-शुकादिविहंगजुष्टम् ।।३८।।

तस्मिन् वने विपुलसहस्त्रदीप्तं,
मध्यमरूढं(?) कुसुमोत्करपारिजातम् ।
सिहांसनप्रवरदर्पणपूर्णकुम्भं
राजद् वितानवरमकम्पमुज्वलन्तम् ।।३९।।

श्रीमङ्क्ये (श्रीमंडले) पुटित (?) वह्नि पुरस्य मध्ये ।
विद्युत्प्रभाविलसितं कमल° वि° (विम्बं) ।
सिहांसनो परिहुता (परिवृता) सन् सूर्यचन्द्र-
विवस्थितं (व्यवस्थितं) निधि (विधि)-
धृतापृकसिद्धियलम् (?) ।।४०।।

तत् कर्णिकागतमचिन्त्यमनेकचन्द्र-
मुक्तामणिस्फुटितकुम्भवितानभासम् ।
भालस्थलग्रथितचारुशशाङ्क खण्डं,
निर्यत् (निर्गत) - सुधारससमाद्युतदिव्यगात्रम् ।।४१।।

विद्युल्लतासदृशचारुतरं प्रबन्ध-
रत्नादिजालममलाङ्गमनङ्गकल्पम् ।
कादम्बरीवरसुधापरिपूर्णपात्रं,
संसक्तपाणितलमु(द्)धृतरत्नदण्डम् ।।४२।।

प्रा(ले) यचन्द्रधवलो त्रमशंषभार(?)
श्रीक्रुंकला॰गद(?)महावलयादिभूषम्,
मन्दस्मिताञ्चितमुरवं कमनीयजालं,
भूषा विभूषितमजादिसुरौद्यवन्द्यम् ।।४३।।

तद्वामां ....लगता,
....................भावयेत्परमेश्वरि ।
अलोलमणिताटंकामाता म्रमदिरेणपम् (?) ।।४४।।

क्रुचं मन्दारभारोद्यन् मन्दस्मितयुताननाम् ।
चारुग्रैवेयमङ्कुलां वृत्तोत्तुङ्गस्तनान्विताम् (?) ।।४६।

चारुरूपोरणायुगाम् (? आरक्तपद (पाद) पङ्कजाम् ।
शोभालावण्यसौन्दर्यसमुदायस्वरूपिणीम् ।।४८ ।।

श्यामलां शिवपद्मस्थां कोमलां यौवनोज्ज्वलाम् ।
भक्ततापत्रयीशत्रुं मधुरस्मितचन्द्रिकाम् ।।४९।।

नखाङ्कुरविनिर्भिन्नकालमृत्युयमादिकाम् ।
सर्वसाम्राज्यसम्पत्तिप्रदातृसुरभूरुहाम् ।।५०।।

सर्वलक्षणसम्पन्नां सर्भा(सर्वा-) भरणभूषिताम् ।
सप्ताधारेषु मन्त्राणां भावयेद् भावयोगतः ।।५१।।

विद्युज् जाम्बूनद - जवी (जवा?) लीनाशुक्लाभिरक्ताकाः ।
कोटिचन्द्रनिभं चान्द्रं वर्णत (वर्णा)स्ते प्रकीर्तिता ।।५२।।

एवं वर्णात्मकं देहं भावयित्वा विचक्षणः ।
जपेद्विद्यां महेशानि शर्वविद्याधिनायिकाम् ।।५३।।

सम्यग् दीक्षविधौ देवि गुरुणा समुदीरितम् ।
नान्यथा फलदं मन्त्रं कल्पकोटिशतैरपि ।।५४।।

विनापि कलाशासकै दीक्षागुरुमुखात् श्रुता ।
कुम्भपूजाविधौ सम्यक् कृत्वा प्रोक्षणमार्गतः ।
तस्यापि गुरुभक्तस्य जायते सिद्धिरुत्तमा ।।५५।।

।।इति श्रीमत्स्येन्द्रसंहितायां नवमः पटलः।।

।।दशमः पटलः।।

[26a] दीक्षाविधिं प्रवक्ष्यामि येन योगी मलक्षयम् ।
प्राप्नोति दुर्लभां सिद्धिं अचिरादेव पार्वति ।।१।।

एकान्ते विजने देशे पशुदृष्टरगोचरे (पशुदृष्टि°) ।
समं भूमितलं कृत्वा दर्पणोदरसन्निभम् ।।२।।

वस्त्रप्रावरणाद्देवि (° प्रावरणैर्देवि) मण्डलेन वितानके ।
भूषयित्वा यथान्यथं(यथान्यायं) उपलिप्य विधानतः।।३।।

उपविश्यासने दिव्ये प्राङ्मुखो नियतः शनैः ।
विघ्नानुत्सार्य यत्नेन प्राणायामैर्जितेन्द्रियः ।।४।।

स्वपुरो दक्षिणे भागे विदध्यान् मण्डलं शिवे ।
चतुरस्त्रं महेशानि मध्ये वर्तुलाजितं (वर्तुलराजितम्) ।।५।।

तत्र शंखं प्रतिष्ठाप्य साधारं पात्रकं तु वा ।
पुरयेद (पूरयेद्) गन्धनोयेन(गन्धतोयेन) हेतु (?)
मिश्रेण योगवित् ।।६।
आधारं पात्रं (गात्रं) संचिन्त्य पात्रमर्क (पात्रमर्कं) विचिन्तयेत् ।
वारि सोममयं ध्यात्वा तत्तन्मत्रैः प्रयुज्य च ।।७।।

षडङ्गेनाचयेन् (°नार्चयेन्) मूलविद्यया सप्तवारकम् ।
प्रजप्य प्रोक्षयेत्तेन सपर्या साधनादिकम् ।।८।।

तदर्घ्यवारिणा देवि स्वपुरो वामकैः पुनः ।
वहन् नाडीन्युतं रुध्वा (रुद्ध्वा) गरुडासनमास्थितः ।।९।।

नदत् पर्णां डना (?) देवि चतुरस्त्रं प्रकारयेत् ।
तन्मध्ये वर्वलं (वर्तुलं) पद्मं कारयेद् विधिपूर्वकम् ।।१०।।

मण्डलाकं (मण्डलकं?) प्रवक्ष्यामि येन पूजाफलं लभेत् ।
विना तेन महेशानि न सिद्धिमधिगच्छति ।।११।।

रोमित्पादौ (रोधनपदं?) समुच्चार्य चन्द्रसूर्यपदं वदेत् ।
अग्निगर्भपदं पश्चात् स्युरयुमं (स्वरयुग्मं) ततो वदेत् ।।१२।।

धर्मार्थकाममोक्षान्तलाभं कुरु युगं (युग्मं?) ततः ।
महासमयशष्टान्ते (शकलान्ते?) खेचरीपदमीरयेत् ।।१३।।

मुद्रामिति समुच्चार्य जनवीस्यपाटयेति च (?)।
शांभवव्यासपदं प्रोक्ता (?) या पदं च समुच्चरेत् ।।१४।।

पवुर्त्वथिनां सिध्यं ते सामर्ध्वं दहयुक् पुनः (?) ।
पमुत्काकि च युग्मां ते कालेयुकारद पुनः (?)।।१५।।

[27a] मण्डलां ते च ब्रह्मांडं खं कलान्ति (कलान्तं?) वदेत् तदा।
विधदिद्वग्निसाध्यां दुःखं उ (?) युक्तं वदेत् तदा ।।१६।।

महाचन्द्रासवो प्रोक्तो हसहेमिति कि पुनः (?) ।
मण्डलाणुरयं देवि पञ्चप्रणवसम्पुटः ।।१७।।

अनेन विधिना कृत्वा मण्डलं विधिपूर्वकम् ।
पूर्वादिषु चत्रर्दिक्षूण (चर्तुदिक्षु) मध्ये वै रत्नपञ्चकान् ।।१८।।

गतस्व मर्त्त्यया तालं नागसंघा (°संघाः) क्रमेण तु ।
ईशानादिषु कोणेषु मध्ये वै तारपञ्चकम् ।। १६

विनस्याधारमाधाय हेथात्र (?) पदमुच्चरेत् ।
आसनाय तथैकारं विन्दुयुक्तं पुनर्वदेत् ।।२०।।

अनेन (आ)धारमंभ्यर्चत् पंचाग्रमण्डलं (पञ्चांगमण्डलं) स्मरेत् ।
तत्पात्रं समांधाय (समाधाय) ध्वायतं (ध्यायन्तं?)
परिशोधितम् ।।२१।।

पुरतो वाग्रवेनैव (वाग्रिवानैव) श्रीपात्राधार उच्यते ।
आसनान्तु देवेशि पात्रं ध्यायेद् दिवाकरम् (दिवानिशं) ।।२२।।

संशोधितं घटस्थेन पूरयेत्सुध (सुधा) हेतुना ।
सद् विनियेन (?) देवेशि शोधयित्वा क्रमेण तम् ।।२३।।

स द्वादशान्तो ज्वलितः मुद्रया देवमुद्रया ।
धाराम(र्घ्य)-समापूर्णां भावयेत् सोमरूपिणम् ।।२४।।

पूर्ववजक्ष्ण (?) मध्ये मध्ये कोणेषु मध्यके ।
पञ्चरत्नानि विन्यस्य विन्यस्येत (विन्यसेत्) तारपञ्चकम् ।।२५।।

वामाङ्गुष्ठानांम योत्स्वस्वसलिनेवसेसेवरि (?)।
सप्तवारं सकृज् जप्त्वा धिवि (विधि)वन्मूल - (अ ?) विद्यया।।२६।

पूजयेद्गन्धपुष्पाद्यै धूपदीपादि दर्शयेत् ।
...........प्रोत्मानं पूजोपकरणानि च ।।२७।।

द्रव्यान्तरं मण्डलं च सर्वविद्यामयं भवेत् ।
ततो पूर्वोक्तविधिनां सम्यक् विन्यस्तविग्रहः ।।२८।।

सिद्धखरहोद्रिक्त (?) कुसुमै रक्तचन्दनैः ।
षट्कोणं विलिखे(द्) देवि मष्ट(अष्ट)कर्णिककेसरम् ।।२९।।

सहस्रदलसंयुक्तं भावनाविहितं तदा ।
पश्चिमे षोडशदलं भात्वंशं वायुकोणके ।।३०।।

इरोदशदले (?) पूर्वे षकारं (?) परिकल्पयेत् ।
चतुर्दलमध्यग्रेय्यां (?) द्विगुणं निर्ऋतिकोणके ।।३१।।

तद् (ततः) बहिर्विलिखेद् यन्त्रं तद् (ततः) बहिः परमेश्वरि ।
चतुषष्टिदल्वं (चतुः षष्टिदलं) पद्मं हृद्धतमेव
(हृद्गतमेव ?) च ।। ३२।

बहिरालिख्यत्य (तद्ध x?) तं योगी भूपुरेण समन्वितम् ।
चतुर्द्वारसमायुक्तं सम्यकां प्रौक्ष (सम्यक् आप्रोक्ष्य) पूजयेत् ।।३३।।

मध्ये विन्यस्य कलशमष्टगन्धोदकान्वितम् ।
षडेव कलशान् कोणेष्वाधाय परमेश्वरि ।। ३४।।

सम्पूज्य गन्धपयसा दिव्यार्घ्यजलसंयुतान् ।
रक्तवस्त्रैः समाच्छन्नान् रक्तयुक्तान् प्रपूजयेत् ।। ३५।।

मध्ये शिवौ समावाह्य पूज्य सर्वोपचारकैः ।
जपेत्वारं शिवं शान्तं योगिनीषट्कमध्यगम् ।। ३६।।

पूजयेत्वा (पूजयित्वा) यथा न्यायं तर्पयित्वा परामृतैः ।
षट्कोणकलशेष्वेवं डाकिन्याद्याः समर्चयेत् ।। ३७।।

तत्तदलेषु देवेशि तास्ताः सम्यक् प्रपूजयेत् ।
चतुःषष्टिदले बाह्ये तदुक्तन्यासमार्गतः ।। ३८।।

निध्यष्टकसमायुक्ताः सिद्धयस्त्वणिमादयः ।
तथा चटकभूरकौ दुर्गाक्षेत्रेशमेव च ।।३९।।

[28a] च(तु)ष्कोणेषु सम्पूज्य धूपदीपानि दर्शयेत् ।
पूजान्ते जुहुयाद् वह्नौ बलिं दद्याद् यथाविधिः ।।४०।।

श्रीशव्दान्ते वरपदं मर्षावर्णान् (?) समुच्चरेत् ।
नाथान्ते श्रीपदं प्रोक्ता (प्रोच्य) परमाणामुदीरयेत् ।।४१।।

स्वारीपूर्णीच्च (?) श्रीपर्णान् पादुकां पूजयामि च ।
प्रोक्ता (प्रोच्य) सम्पूजयेद् देवि तार्पयामि
(तर्पयामीति) तर्पयेत् ।।४२।।

अनेन क्रमे योगेन पूजयेत् सर्वदेवताः ।
आदौ सिरसि (शिरसि) देवेशं षडाधारेषु चैव हि ।।४३।।

पूजयित्वा महेशानि बहिरेव समर्चयेत् ।
पूर्वं गिरिगणेशानौ पूजयिद् (पूजयेद्) वामदक्षिणे ।।४४।।

तथा बटुकभेरुकं (बटुकभैरवं) दुर्गाक्षेत्रपतीन् क्रमात् ।
तत्तन्मंत्रैः समभ्यर्च्य तर्पयित्वा परामृतैः ।।४५।।

विश्वनाथं यजे शम्भुं (यजेच्छम्भुं) शुद्धकारणवारिणा ।
पश्चिमे कलशे देवि हंसानन्देन संयुताम् ।।४६।।

डाकिनीं पूजयेत् सम्यक् दलेषु क्रमयोगतः ।
अमृताकर्षिणीं चैव इन्द्राणीशानिरेव च ।।४७।।

उमां चोर्ध्व लका ऋद्धि ऋहलका (?) तथैव च ।
भूषा तथैकरीराय (?) ऐश्वर्या च तथापरा ।।४८।।

ॐकारात्त्वोषधा देवि यक्षराज्ञाश्च (यक्षरक्षांसि) षोडश ।
दलेषु तेषु विख्याता योगिन्यो योगसिद्धिदाः ।।४९।।

वायव्ये कलशे नित्यानन्दभैरवसंयुताम् ।
राकिनीं पूजयेद् देवि दलेषु च महेश्वरि ।।५०।।

कालरात्रि च सातीता गायत्री च तृतीयका ।
घन्टाकारणसंज्ञा च ....र्णं चका (?) तथैव च ।।५१।।

भयाभया च हूंकारी ज्ञानरूपा तथैव च ।।५२।।

टकंरुस्ता च हूंकारीत्युक्ता दलदेवता ।
ईशन्यैकजसे देवि ....ष्टानं दे न संयुतम् (?)।।५३।।

लाकिनीं पूजयेत् तत्र दलेष्वेवं प्रपूजयेत् ।
कामरीति तथा पाटकारिणी (?) रामिणी (राकिनी) तथा ।।५४।।

तामसी स्थानवी (स्थान्वी) द्राक्षा पूर्णिधीत्री (?) च नन्दिनी ।
पार्वती चैव कटकारी (?) दश वेति प्रकीर्त्तिताः ।।५५।।

पूर्वस्यां दिशि कुम्भं भोगानन्दसमन्वितम् ।
काकिनीं पूजयेत् तत्र दलेषु क्रमयोगतः ।।५६।।

बन्दिनी भद्रकाली च माया चैव यथस्विनी (यशस्विनी)।
रमा लम्बोष्ठिका चैव दिव्यास्तत्र प्रकीर्त्तिताः ।। ५७।।

अग्निय्यां (आग्नेयां) कलशे देवि लोलानन्देन संयुताम् ।
शाकिनीं पूजयेद् देवि दलेषु वरदां श्रियम् ।। ५८।।

चण्डां सरस्वतीं चैव पूजयेत् क्रमयोगतः ।
नैरीत्यां (नैऋत्यां?) कुलशे (कलशे?) भूषां नन्देन
सह काकीनीम् ।।५९।।

पुज-(युग?)हंसवती चैव दलयोश्च समावतीम् ।
मध्ये परशिवं भक्ता पूर्वोक्तमनुना यजेत् ।।६०।।

वृन्ते पूर्वादिताः पूज्या श्रीकण्ठाद्याः सशक्तिकाः ।
चतुःषष्टिदले बाह्या तावत्यो योगिनीः स्वयम् ।।६१।।

पूजयेत् सर्वसिध्यर्थं तासां नामानि वै श्रृणु ।
अक्षोभ्यरिक्षक......च राक्षपणीक्षया (?)।।६२।।

पिगंलाक्षी क्षयाक्षेणा (?) शिला लिला (?) तथैव च ।
लयलाला (?) दलंका च लंकेशी लालसाव्हया ।।६३।।

कराला कुलिनी चैव विशालाक्षी तथैव च ।
वडवा-वक्त्रा तथैव च महोदरा ।।६४।।

मन्त्रदी सर्वत्वकाल थरावै कालजंयिका(?)।
विद्युज्जिह्वा च रक्ताक्षी तथैव च करंकिणी ।।६५।

मेघनादा ग्गारुडीग्रा (?) कालकण्ठी वरप्रदा ।
चन्द्रा चन्द्रावती'चैव प्रपञ्चा प्रलयान्तिका ।।६६।।

रिपुवक्त्रा विशाला च पिशिता चैव लोलुपा ।
वामिनी वमिनी चैव तपती पावनी तथा ।।६७।।

क्षतानना वहत्कुक्षि विकृता विस्वरुपिणी ।
यमजिह्वा जयन्ती च दुर्जया च यमान्तिका ।।६८

[29a] विकाली रेवती चैव पूतना विजया तथा ।
चतुः षष्टि दलैश्चैव तपनी पावती तथा ।।६९।।

.... योगिन्य (योगिनीः) परिपूजयेत् ।।७०।।

पश्चिमादि महेशानि तद् बहिश्चाष्टपत्रके ।
दलमूलेषु पूजाश्च भैरवमातृभिः सह ।।७१।।

असिताङ्गो रुरुश्चण्डः क्रोधश्चोन्मत्तभैरवः ।
कपाली भीषणाक्षश्च संहारश्चाष्टभैरवाः ।। ७२।।

ब्राह्मी च मङ्गला चैव माहेशी चर्चिका तथा ।
कौमारी चैव योगेशी वैष्णावी हरसिद्धिका ।।७३।।

वाराही चैव भद्रा च ऐन्द्री किलकिला (?) तथा ।
चामुण्डा कालरात्रीश्च महालक्ष्मीश्च भीषणा ।।७४।।

पूर्वादिदलमूलेषु शक्तिद्वयसमन्वितान् ।
भैरवान् पूजयेद् देवि सर्वाभीष्टफलाप्तये ।।७५।।

दलाग्रे सिद्धयः पूज्याः सर्वादिनिधिवाहनः ।
अणिमा महिमा चैव गरिमा च तथेशिता ।।७६।।

वशित्वं च महेशानि प्राकाम्यशक्तिरेवच।
(प्राप्तिश्च लघिमा चा) ष्टासिद्धयः सर्वकर्म च (सर्वकर्मसु) ।।७७।

तथा पद्ममहापद्मौ मकरकच्छपस्तथा।
मुकुन्दो नन्दनो नीलः शंखश्चैवाष्टमो निधिः ।।७८।।

इन्द्राद्याश्चैव लोकेशाः पूज्या पूर्वादितः क्रमात् ।
इति सम्पूज्य देवेशि धूपदीपानि च क्रमात्। ।७६।

दत्वा नैवेद्यम् अचदत्वा (?) अग्नौ बलिमाहरेत् ।
साधारं चषकं स्थाप्य मण्डले चतुरस्रके ।।८०।।

अन्नपूर्णां सलिलं स द्वितीयं सहेत्रुकं (?) ।
पुष्पताम्बुलदीपाद्यं पूर्वमन्त्रेण दापयेत् ।।८१।।

तर्ज्जनीमुद्रया देवि ध्यायेत् तं भूतवेष्टितम् ।
भैरवान् योगिनीवृन्दं क्षेत्रेशा नाशा (?) नायकम् ।।८२।।

तत् तन्मंत्रैश्च सन्तर्प्य भूतादिभ्यो यथाविधिः।
त्रि-त्रि-विन्दुनिपातेन तर्पयेत् परमेश्वरि ।।८३।।

।। इति मत्स्येन्द्रसंहितायां दशमः पटलः ।।

। । एकादशः पटलः । ।

अथ नैवद्यमुत्सृज्य मुखवासादि दापयेत् ।
मुद्राश्च दर्शयेत् पश्चात् पूजान्ते सर्वसिद्धये । । १

दक्षव्यांशो (°वामौ?) भुजौ देवि परिवर्त्त्य तथाङ्गुलीः ।
तर्जनीभ्यां समाक्रान्ते सर्वार्द्ध ....मध्यमे । । २

अङ्गुष्ठौ तु महेशानि कारयेत् सरलावपि ।
एषा हि खेचरी मुद्रा सर्वसिद्धिप्रदायिनी । । ३

पुटाकारौ करौ कृत्वा तर्ज्जन्यङ्गुष्टकौ समौ ।
कारयेत् सरलाकारौ दीपमुद्रेयमीरिता । । ४

सर्वसिद्धिकरी देवि सर्वविघ्नविनाशिनी ।
एतस्या एव म[illegible]या तर्जन्यो (:) कुटिला गतिः । । ५

अङ्गुष्ठौ शृङ्गवत्कृत्वा शृङ्गमुद्रेयमीरिता ।
सर्वदु[illegible]प्रशमनी सर्वोपद्रवनाशिनी । ।६ । ।

करौ संश्लिष्य चान्यांन्यमङ्गुलीव्यत्यथेन च ।
मुद्रैषा सौभरी नाम सर्वव्याधिविनाशिनी । ।७ । ।

एता (:) मुद्रा (:) मयाख्याता दिवि (देवि)-प्रोक्ताः शुभावहाः ।
ततः स्वमूर्ध्नि कमले सहस्रवलसंकुले (सहस्रदलसङ्कुले) । ।८ । ।
पादुकामन्त्रमुच्चार्य गुरुनाथं प्रपूजयेत् ।
तथा सर्मार्पतशेषेण कारणेन समन्वितम् । ।९ । ।

[30a] चषकं तत् समु(धृ)त्य गुरवे च निवेदयेत् ।
तत्त्वत्रयाणुनां (?) दत्त्वा विचारं विदुं (विदुः) तर्पणम् । ।१० । ।

स्तुतिभिश्च नमस्कृत्य पूजयेत् क्रमयोगतः ।
ॐ नमो (ऽ) नन्तरूपाय शम्भवे परमाणुवे । ।११ । ।

सर्वमन्त्रमहायोगफलदानैकहेतवे ।
नमो (ऽ)नलात्मने (ऽ)नन्तशक्तये परमात्मने ।।१२।।

दिव्यज्ञानसुधातृप्तिरुपिणे विश्वरुपिणे ।
वेदपञ्चकषड्वेदपञ्चवेदक्रमात्मने (?) ।।१३।।

तच्छक्तिगणसंश्लेषः- कृप्ति(तृप्ति) - तृप्ताय शम्भवे ।
भादिकूटसमुत्पन्न ज्योतिर्लिङ्गस्वरूपिणे ।।१४।।

सादिकूटार्णसम्भूतशक्तयालिङ्गितमूर्तये ।
आब्रह्मस्तम्बपर्यन्तमूर्तामूर्तस्वरूपिणे ।।१५।।

स्वप्रसादामृतोल्लास-सर्ववृत्तिविकाशिने ।
तरुणामृतकल्लोलधारादृक्पात भैषजः (°भिषजे?) ।।१६।

स्वभक्ति -इतित (° रतितो) व्याधिजरामृत्युविनाशिने ।
नमो योगामृतध्वस्त - सस (?) - योनि कलेवरे ।।१७।।

परमानन्दरूपेन्द्र दयक्ष्यादवामृताम्भसे(?)
रुचिभावघनसारौघ सान्तदुष्करकर्मणे ।
योगिनो योगसाम्राज्य दक्षिणे शम्भवे नमः ।।१८।।

सर्वाज्ञासिद्धिसाम्राज्ययोगविद्यास्वरूपिणीम् ।
जीवन्मुक्तिप्रदां वन्दे भैरवीं विश्वनायकाम् ।।१९।।

मध्ये वग्मवमध्यय (वाग्भवमध्यस्था) चटकरचिता
(षट्करचिता) विश्वानना विश्वगा,
पञ्चप्रेतकृतासना कुजतनुर्ज्याषट्प्रकारोज्वला ।
विद्युत्कोटिनिभप्रभा भवभयप्रध्वंसिनी भासते
भूयान् मे भुवनेश्वरी भुवनसूरीष्टाप्तये यक्षिंणी ।।२०।।

पद्मपाणिचतुष्टयेन करदी ....नगांनना (?),
नत्तु ये वरदाभये तकदधी (ती) त्वद्यथिभूतस्थिता (?)।

मूलस्था भुवनाध्वगा हृदया (-गा) दुग्धोदनैकप्रिया,
सानन्दा ज्वलिनीपमा (ज्वलंतोपमा) वित(र)-
तु श्रेयांसि मे काकिनी ।।२१।।

श्यामाङ्गो वरषेट-(?)-श्वद्म-(सद्म)-कसरो द्योलो (?) भजन्ति त्रिका (?),
स्पन्दद्वयवती (?) शिरोमनुभवा (?) भावासनास्थायिनी ।
कामस्था (?) पदमार्गशोधनकरी, रक्तग्रं (?) हैकाग्रता,
स्वाधिष्ठानगता सितोद (?) रुचिरा सा पातु मां काकिनी ।।२२।।

वर्णाध्वप्रतिति (x)- शोधिनी शिखरितो भेरण्डवक्त्रया (?)
गृच्छ (वृक्षा)-रोहणतत्परा प्रभुपदस्यां (?) कुस्यमाशुद्धयाम् (?)।
मातस्या न गतिः स नाति निलघा पिंगानुडानंप्रिया (?),
माम व्याद (?) चिराद्धिखानुजनिता (?) मांसाशिता लाकिनी ।।२३।।

मेदस्थां हरितप्रभां कवचजां मत्रांद्यसंशोधिनीं
दध्य (न्) नातिरुचिं यो हे (?) नतु च त्रुषाद्यां (?) विडालासनाम् ।
दानस्थानगतां शशाङ्कविभवस्थां शूलमुदो (?) ज्वलां,
योगस्थामभिरस्थ- गीलकपदां (?) वन्दामहे काकिनीम् ।।२४।।

विभ्राणा लकुटं च मूकमसिता पञ्चभुवल्कोज्वला (?),
रौद्रस्थानपदानुगा ध्वम (?)(अ) जिताभीतासितास्थिप्रिया ।
उद्यानैकरुचित्स्वक्रछुटकृतारीहा (?) जवाद् (?) वन्दिता,
पर्यारुच्च - कलाध्वशोधनवती भूयान्मुदे शाकिनी ।।२५।।

देवीं शूलकपाललालितकरां मृण्यास्य षष्वोग्रिम् (?),
भाणु (?) प्रभवां वलर्क्ष (?) विहगारूढां सतत्त्वाध्वगाम् ।
हारिद्राभनिभां सशाम्भवपदां पादस्थितापटलां
वन्दे सर्वगतां संविदुवसतिं शूलस्थितां हाकिनीम् ।।२६।।

[31a] कपालशूलषट्काङ्गवलयान्वितपाणयः ।
श्रीकण्ठाद्या (:) स्वस्वमात्रैः (°मन्त्रैः)
पूजनीया (:) प्रयत्नतः ।।२७।।

तेषां च शक्तयः शूलकपालसहिताः शुभाः ।
चतुःषष्टिदलैर्देवि योगिन्यो योगसिद्धिदाः ।।२८।।

सर्वाभरणसम्पन्ना(:) सर्वा (:) मरकतप्रभाः ।
साक्षतं तिलकं भाले विभ्रन्त्यः समरांभराः (?)।।२९।।

मदिरासर्वसम्पूर्ण (:) कपोलोज्वलपाणयः ।
मात्रदंकधरा (?) किञ्चित् स्मिताननसरोरुहा ।।३०।।

वेणीवन्धोज्वलन्माल्या भैरवाङ्कसमाश्रया (:)।
तेऽपि शूलकपालोद्भूता त्रिकटिभूषणाः ।।३१।।

मदिराघूर्णितदृशः शोणवस्त्रानुलेपना (:) ।
भैरवाङ्कसमारुढाः पद - प्रौढांबुजाननाः ।।३२।।

यष्टव्यां (?) मातरः स्वाष्टादष्टपत्रेष्वभीष्टदाः (?) ।
दलाग्रे सिद्धयः पूज्या (:) विधिवन् निधिवाहनाः ।
तत्तंत्रोक्तविधिना हेरम्बादीन् समर्चयेत् ।।३३।।

स्वांशाष्टकोद्दीपितमूलवर्णे
षट्भिस्तप्या (:) षट्स्वरभेदितैव ।
स्व स्वानुकू टैरपि नाम चोक्तां (?)
मां दक्षयुग्मं त्वथ धातुनम (धातूनाम्) ।।३४।।

दक्षेति युग्मं त्वथ शर्वप्टाष्टं (?) वशं करीत्येवजधोभितारव्यौ (?),
देवि चितोक्तानमइत्यथा (?) चितेव विद्येपदमुच्चरीयतादित (?)
वाल्नरास्माभि (?) च
सादिकू (ट) मुच्चार्य वांच्छाय युगं तथान्ते ।।३५।।

व्योमवरौकादि यतोद्यनाद्य (?)
नामावसाने (ऽ) पि च पादुकान्ते ।
स लोहितात्वीश जयामि चेति (?)
रसोरनंगोऽपि च वागूभवं च ।।३६।।

अनेन सप्तक्रमभेदितेन
प्रपूजयेत् पार्वति सप्त देवीः ।
स पञ्चतारैरपि मातृकार्णैः
श्रीकण्ठमुख्यानपि पूजयेच्च ।।३७।।

दले चतुःषष्टिमये च तत्तन्
मूलार्णमूक्तैरपि पञ्चतारैः ।
अष्टाष्टागमोक्तक्रममन्त्रवर्ये
ब्रह्मार्णमुख्या न सितांकादीन् (?) ।।३८।।

वर्गाष्टकैरेव च सिद्धिवृन्दं,
तद्बीजयुक्तानपि लीकनाथान् (लोकनाथान्?) ।
ततः शिरसि देवेशि परम्पर्यक्रमेण तु
गुरुभक्तिर्यजेद् भक्त्या सगुरुं तं समर्चयेत् ।।३९।।

विद्यमाने गुरौ स्थाने मुक्तव्योम्नि लये नयेत् ।
लब्धानुज्ञः प्रसादार्थे तत्त्वमंत्रैस्त्रिभिः पुनः ।।४०।।

प्रसादीकृत्य तच्छेषं चरुप्रासनमेव च ।
अथ शिष्यं समानीय भक्तिप्रणतचेतसा ।।४१।।

सामान्यार्घेण संप्रोक्ष्य तत्त्वमन्त्रैरपि त्रिधा ।
दद्यात् प्रसादं देवेशि सम्यग् बटुकमेव च ।।४२।।

ततः प्राङ्मुखमासीनं शिष्यं गुरुरुदारधी (:) ।
पश्चिमदिग्घटं गुह्य (गृह्य) सम्य (क्) तमभिषेचयेत् ।।४३।।

अथालङ्कृतमासीनं पूजास्थाने पुनर्गुरुः ।
प्रीक्षा (प्रोक्ष्या)र्घवारिणा दद्यात् तत्तुमन्त्र (:) प्रसादकम् ।।४४।।

त्रिवारं परिदद्यात्तु मात्रेणः (?) अमृतमुत्तमम् ।
स्वदोषं परमेशानि पशुपाशविमोचनम् ।।४५।।

अथासीनस्य शिष्यस्य प्रतिलोमेन मातृकां ।
शरीरे विन्यसेत् सर्वपापसंहरणाय च ।।४६।।

पुनश्चैवानुलोमेन सप्तवारं प्रविन्यसेत् ।
श्रीकण्ठादीन् न्यसेन्मूलं मन्त्रन्यासमथा परं ।।४७।।

वक्ष्यमाणक्रमेणैव योगिनीन्यासमेव च ।
सप्तधारेषु विन्यस्य शिष्यस्य परमार्थवित् ।।४८।।

एवं विनस्तदेहस्तु नमस्कृत्य गुरुं च पुनः ।
प्राचन् (प्रोच्य) मन्त्रवरं शिष्या(शिष्याय) दत्वा
वास्यसमीहितम्।।४९।।

अथास्य सप्तधारेषु सप्तवर्णाननुस्मरेत्।
(32a)
प्रवदे (द्) दक्षिणे कर्णेमन्त्रराजं गुरु (:) स्वयम् ।।५०
मूर्ध्नि हस्तौ समाधाय भूयस्तमनुशासयेत् ।
प्रजपेच्च सप्तवृत्या स्वसामर्थ्यं प्ररक्षितुम् ।।५१।।

शिष्यो(ऽ)पि गुरुणा लध्वं जपेत् मन्त्रं शतावरम् ।
ततो वरं समुधृत्य भुञ्जीत सह तेन तु ।।५२।।

शिष्यो(ऽ)स्याभरणै वस्त्रै (:) गुरुमभ्यर्चयेत्पुनः।
दिने दिने यथाशक्ति जपेद्विद्यां प्रसन्नधी (:)।।५३।।

अनेन विधिना दत्ता विद्या भवति कातदा (कार्यदा) ।
अन्यथा गृह्णतः सिद्धि न (द) दाति सुरार्चिते।।५४।।

तस्मात् सर्वप्रयत्नेन दीक्षां प्राप्य जपेन् मनुम् ।
एतत् गुह्यतमं देवि दीक्षाकर्ममथोदितम् ।।५५।।

सर्वसिद्धिकरं पुण्यं सर्वयोगफलप्रदम् ।
सर्वैश्वर्यकरं चैव सर्वलो(क)जयावहम् ।
सर्वविघ्नप्रशमनं समस्ताभीष्टदायकम् ।।५६।।

न मन्त्रसिद्धिर्न च योगलाभो न वास्य पूजा फलदानसिद्धिः ।
न चापि मृत्युर्न जरा जपेच्च विनैव दीक्षाविधिना महेशि ।।५७।

।। इति मत्स्येन्द्रसंहितायां एकादशः पटलः ।।

। । द्वादशः पटलः । ।

[32a] ईश्वर उवाच —

अथातः संप्रवक्ष्यामि मन्त्रसाधनमुत्तमम् ।
नदीसमुद्रतीरेषु पर्वताग्रे (षु) वा सुधि (सुधी) । ।१ । ।

शिवालये गृहे वापि पूजां कृत्वा पुरोदिताम् ।
विना च कुलशासकैर्विजने परमेश्वरि । ।२ । ।

मत्प्रसात् प्रसन्नात्मा सम्यगासीनमासने ।
कुङ्कुमक्षोद(°माक्षत)दिव्याङ्गे रक्तवसनधरासनः । ।३ । ।

दिव्यपुष्पावृतो मौनि(मौनी) कालागरुविधूपितः ।
चन्दनागरुकपूरैरधिवासितविग्रहः । ।४ । ।

पूर्ववन् माप्रा (?) समास्थाय मुद्रासन्नध्व (मुद्रासन्नद्ध) विग्रहः ।
पूर्वोक्तध्यानयोगेन संचिन्त्य लयमारभेत । ।५ । ।

चन्दनागरुकर्पूरमृगनाभिसुगन्धितम् ।
रुद्राक्षस्फाटिकमयीमक्षमालां करे धृतम् । ।६ । ।

सहस्रं वर्त्तयेन्नित्यं मन्त्रराजं समाहितम् ।
स लभे (द्) दु -(र्ग)- मां सिद्धिं देवैरपि सुदुर्लभाम् । ।७ । ।

वर्षत्रयेण देवेशि सत्यमेतन्न संशयः ।
पूजयित्वा यथान्यायं यदि लक्षं जपेन्मनुः । ।८ । ।

स सप्तजन्मप्रभवैः पातकैः परिमुच्यते ।
लक्षद्वयेन देवेशि कोटिजन्मसमुद्भवैः । ।९ । ।

मुच्यते पातकैर्योगी सिद्धिं च लभते पराम् ।
लक्षत्रयेण मूको(ऽ)पि वागीशत्वमवाप्नुयात् । ।१० । ।

सर्वज्ञत्वमसम्बाधं लभते नात्र संशयः ।
चतुर्लक्षं यदि जपेन्मन्त्रमेतत् समाहितः ।।११।।

लभते स्तम्भनसिद्धि (ः) लोके परमदुर्लभाम् ।
अग्निस्तम्भं जलस्तम्भं मेघानिलनिवारणम् ।।१२।।

सैन्यस्तम्भं गतिस्तम्भं चक्षुस्तम्भमनुत्तमम् ।
यद् यद् वाञ्छति देवेशि तत्तत् संभ(व)ति क्षणात् ।।१३।।

पञ्चलक्षेण देवेशि लोके वै श्रवणोपमः ।
आज्ञासिद्धिमवाप्नोति सर्ववाधाविवर्जितः ।।१४।।

साम्राज्यगुणसम्पन्नो वलिपलितवर्जितः ।
भविष्यति महेशानि चिरञ्जीवी स्नरें (?) रपि ।।१५।।

षड्लक्षं विधिवज् जप्त्वा योगी खेचरतां लभेत् ।
सुदूरदर्शनं चैव दूरश्रवणमेव च ।।१६।।

मनोजवं कामरूपं परकायप्रवेशनम् ।
स्वच्छन्दमृत्युर्देवानां सहक्रीडा सुदर्शनम् ।।१७।।

अङ्गुलग्र(अङ्गुल्यग्र) निपाताद्यै भूमेरपि च कम्पनम् ।
इच्छेच्छक्तः स्वयं पातुं समुद्रमपि नातुरम् ।।१८।।

शरीरादग्निनिर्माणं तत्रापभयवर्जितः ।
शक्यं जगदिदं दग्धुं यदीच्छेदप्रयत्नतः ।।१९।।

[33a] त्रिकालज्ञत्वमद्वन्दं परिच विज्ञया (?) ।
व..............र्का वु विषादीनां प्रतिष्ठां भो पराजयः (?) ।।२०।।

एतान्यन्यांश्च देवेशि सिद्धिं चात्यन्तदुर्लभाम् ।
षट्लक्षजपमात्रेण योगी भवति सर्वदा ।।२१।।

सप्तलक्षं यदि जपेद् विद्यामेतामनुत्तमाम् ।
स शिवः सर्वलोकानां आधिपत्यमवाप्नुयात् ।।२२।।

कर्ता हर्ता च पाता च स्वयमेव जगत्त्रये ।
स्वेच्छागमनसंयुक्तो जीवेदाचन्द्रतारकम् ।।२३।।

इति सिद्धिमनुर्देवि योगिनीवृन्दपूजितः ।
भैरवासौ भवेन् नूनं यन्त्रराजप्रभावतः ।।२४।।

अथ कूटान् प्रवक्ष्यामि योगिनीनां महोदयात् ।
यै (:) साधयन्ति देवेशि योगिनो निजवाञ्छितम् ।।२५।।

विद्या रुद्राक्षरो देवि प्रथमः परिपठ्यते ।
तस्माद् विद्याक्षरो यत (यत्तु ?) द्वितीयं वर्णमुच्यते ।।२६

सर्वस्मादपि च स्वर्णस्तृतीय (:) परिकीर्तितः ।
केवलः सप्तदशको वर्णः प्रोक्त (:) चतुर्दशः (?) ।।२७।

तस्मा(द्) द्वाविशंको (?) देवि पञ्चमो कार्य ईरितः ।
षष्टं च शष्टवर्त्य (?) स्यात् सप्तमं प्राणमुच्यते ।।२८।।

एते वर्णा महेशानि कूटान्यं (?) कुलमाश्रिताः ।
एतेषामेव वर्णानामेकैकस्य महेश्वरि ।।२९।।

एते विषादनि (?) जलपावकादीन् समुद्धरै (त्) ।
स विंशद् विद्र (?) नादाख्य वायुः सागरवर्णकः ।।३०।।

म° श° ते षट्स्वरयुते वा तलेन षडङ्गकम् (?) ।
वृत्या पृष्ट (?) यमो वर्णे सप्तधा तेषु विन्यसेत् ।।३१।।

व्यापकेन कु विन्यस्य ध्यायेत् सप्तविभेदतः ।
पूर्वोक्तपूजामन्त्रेण ब्रह्मरन्ध्रे प्रविन्यसेत् ।।३२।।

हं सा नं दां कगा (?) देवि डाकिन्यो घोरविग्रहा (:) ।
विद्धूमज्वलनान्ता स विशुद्धविग्रहमध्यगा ।।३३।।

कमण्डलुं कर्तरि च धारयन्तीं वरप्रदाम् ।
एवं ध्यात्वा जपेन् मौनी डाकिनीकूटमुत्तमम् ।।३४।।

लक्षावृत्या विशुद्धा चेत् डाकिनी वश्यति प्रिये ।
सिद्धयत्यस्य महेशानि योगविद्या सुदुर्लभा ।।३५।।

दिग् दले मणिपूराख्ये पाशांकुशधरापरा ।
षष्टानां संकगाविन्दा (?) सर्वाश्रितफलप्रदा ।।३६।।

डाकिनी नाम देवेशि योगिनी योगसिद्धिदा ।
तत्कूटं लक्षमानेन ध्यात्वेदं प्रजपेत् सुधीः ।।३७।।

ततः पश्यति तां देवि मणिपूरे महाम्बुजे ।
सर्वयोगफलप्राप्तिं लभते नात्र संशयः ।।३८।।

नास्त्यसाधकं किञ्चित् त्रैलोक्ये सचराचरे ।
स्वाधिष्ठाने षडारे (?) तु भोगानन्दाङ्कगामिनी ।।३९।।

मूलमुकंधरा (?) देवि वरदा हरितप्रभा ।
एवं ज्ञात्वा तु तत्कूटं लक्ष्यावृत्या यदा जपेत् ।।४०।।

ततः पश्यति तामाशु स्वाधिष्ठाने च राजके ।
काकिनी नाम देवेशि योगिनी योगदायिनी ।। ४१।।

त्रिकालज्ञानमाप्नोति खेचरत्वं च लभ्यते ।
वाक्सिद्धिं कायसिद्धिं च वाञ्छितार्थप्रसाधनम् ।।४२।।

योगिनी सिद्धिमाप्नोति शाकिनी जपसाधनात् ।
आज्ञायां द्विदले बालसूर्यकोटिसमप्रभम् ।।४३।।

मूषानन्दाङ्कगा शूलकपालार्पितपाणिनीम् ।
हलक्ष (?) विहगारूढां खेचरैरुपशोभिताम् ।।४४।।

एवं ध्यात्वा च तं कूलं लक्षमानां जपेद् बुधः ।
ततः प्रविश्यति (प्रविशति) परमाज्ञायां लाकिनीं शिवाम् ।।४५।।

[34a] तद्दर्शनसमुध्वस्तमहापातकसञ्चयम् ।
अणिमाहिगुणैर्युक्ता° (अणिमादिगुणैर्युक्तां)
खेचरीसिध्दिमाप्नुयात् ।। ४६।

सहस्त्रारमहापद्मे पञ्चप्रेतकृतासनाम् ।
विद्युत्कोटिनिभां साक्षात् परेशानसमन्विताम् ।।४७।।

पाशाङ्कुशधनुर्वाणाधृतहस्तचतुष्टयाम् ।
ध्यात्वेत्थं परमेशानीं जपेल्लक्षं च तन्मनुम् ।।४८।।

स शिव सर्वविद्योगी भैरभोऽभिभवेत् ध्रुवम् ।
वलिपलितनिर्मुक्तः सर्वव्याधिविवर्जितः ।।४९।।

अजरश्चामरो भूत्वा जीवद् आचन्द्रतारकम् ।
प्रत्येकजपकाले तु पूजा कार्या विपश्चिता ।।५०।।

सर्वविध्ननिवृत्त्यर्थं सर्वाभीष्टफलाप्रये ।
महासप्ततिकूटेन मनुना प्रोक्तमार्गतः ।।५१।।

रात्रौ पूजारतो मौनी लक्षमात्रं यदा जपेत् ।
समासीनं पितृवने सम्प्रदीप्तहुताशने ।।५२।।

सहस्त्रं जुहुयाद्योगी छागासक्कलित-(छागासृक्) क्लृप्तपायसैः ।
आज्यैश्च विल्वै विधिवत् समिद्धिः पूज्य पूर्ववत् ।।५३।।

मदिरानन्दतो भूत्वा सिद्धिमूला मनोन्मना ।
योगिनः सप्त ये तत्र यथा विभवविस्तरम् ।।५४।।

बलिं च दद्याचृच छागासृग्धारया हेतुमिश्रया ।
असपत्रेवता° (?) रात्रिं विचरे(त्) याग (याम) पयर्यं (?)।।५५।।

प्रातः परामृतैरेतो (?) भैरवं योगिनीयुताम् ।
कुमारी बटुकै (श्) चैव तर्पये (द्) द्रव्यविस्तरैः ।।५६।।

भोजनान्ते नमस्कृत्य या चेत् सिद्धिमभीप्सिताम् ।
अनुज्ञातस्तु भुञ्जीत शेषं तु नियतात्मवान् ।।५७।।

अनेन विधिना योगी यथाभिलषितां गतिम् ।
सम्प्राप्य देववद् व्योम्नि विचरत्यजरामरः ।।५८।।

तदा समस्तलोकानां आधिपत्यमवाप्नुयात् ।
एतदुक्तं मया गुह्यं सर्वशास्त्रेषु दुर्लभम् ।। ५९

उत्तमं योगमन्त्राणां भैरवैर्योगिनीयुतम् ।
अनेन मन्त्रवर्येण वाञ्छितार्थानवाप्नुयात् ।
इहामुत्र च भद्रं ते प्रतिपत्याश्नुते फलम् ।।६०।।

श्रीसंपद् योगवृद्धिप्रदममरगणैरप्यशक्र प्रल........ ।
गोप्यालोकेषु विद्यासु धवलयशसां धामं चाप्य प्रियाणाम् ।
भक्तानां गुप्तधीनां गुरुकरुणासुधातृप्त-तृस्यग्प्राधानां(?) ।
मन्त्रो (ऽ) य° सर्वसारागमतिलकसत् सेव्यतां सिद्धिभावैः ।।

।। इति मत्स्येन्द्रसंहितायां द्वादशः पटलः ।।६२।।

।।त्रयोदशः पटलः।।

[34b] श्री ईश्वर उवाच —

अथातः संप्रवक्ष्यामि योगिनीन्यासमुत्तमम् ।
येन विन्यस्त (विन्यस्य) देहस्तु षण्मासाद् भैरवायते ।।१।।

महासमर्षिमन्त्र (°मन्त्रं) तत्कूटं हृदयम्बुजे ।
भावयेल् लक्षसूर्याभं तदुद्भूतां स्वकां तनुम् ।।२।।

कोटिसूर्यसंपृक्त्यां (°सन्निभां) भावयेद् एकदास्थितः ।
मूर्ध्नि श्रीनाथामाधाय स्ववामे पादुकावलिम् ।।३।।

दक्षिणे गण (गणान्) विन्यस्य क्षेत्रे सपृष्टदैशके ।
कात्यायनीं च पुरतः तत्तन्मन्त्रैः प्रविन्यसेत् ।।४।।

विन्यसेन् मातृकामादौ देवि मेनौघशान्तये (?) ।
सुधाविन्दुविसर्गादि (विसर्गाद्यैः) तथा विन्दुविसर्गकैः ।।५।।

विन्यसेन्नियतो योगी ऋष्यादिन्यासपूर्वकम् ।
शिवभक्त्यात्कं रूपं ध्यात्वा विगतमत्सरः ।।६।।

[35a] श्रीकण्ठादीन् प्रविन्यस्य शक्तियुक्तान् स्वसिद्धये ।
तदस्थि (?) मण्डलन्यासमुच्यते सर्वसिद्धिदम् ।।७।।

येन विन्यस्तदेहस्तु योगी स्यात् तेजसां निधिः ।
रक्तदशदले पद्मे मणिपूरकसंज्ञके ।।८।।

आदीक्षीत (?) प्रविलसत् (?) आसायत्र (?) समुज्वले ।
कर्णिकायां महारत्नं त्रिकोणं परिभावयेत् ।।९।।

धातवर्णं (धातुवर्णं) च तन्मध्ये सुरक्तं बिन्दुमत्लैम् (उल्लिखेत?) ।
तदुद्भूतं कृशानुं च रक्तश्वेतांशुकं प्रभुम् ।।१०।।

शक्तिस्वस्तिकसंयुक्तं मयूरवरपृष्टगम् (?) ।
प्रसन्नवदनं स्वर्णमालालंकृतवक्षसम् ।।११।।

स्वभक्तदेहसंलीनं (°संल्लीनं) महापातकनाशनम् ।
सर्वसिद्धिप्रदं देवं स्वप्रियाभीष्टसिद्धिदम् ।।१२।।

तद्रूपरूपमात्मानं भावयित्वा चिरं प्रिये ।
यं अग्निमण्डलाय धर्मप्रदसकलयुक्ताय नमः ।।१३।।

कर्णिकायां न्यसेदेतं मनुं भूयोऽपि विन्यसेत् ।
उत्तिष्ठ पिङ्गलहरि लोहिताक्ष । सर्वकर्माणि
देहि () दापय स्वाहा।आगच्छ आवाह्ये(आवाहनेन)
मन्त्रेण कुर्यात् प्राणकर्माणि धापरं (?) ।
ब्रह्मा ऋषिरनुष्टुपछन्दः ।श्रीप्राणशक्तिर्देवता । आँ ह्रीं क्रों ।
आँ ह्रीं क्रों शब्दरूपस्पर्शरक्त(°रस-) गन्धात्मने
क्रीं ह्रीं आं शिरसे स्वाहा।
आँ ह्रीं क्रों वाक्पाणिपादपायूपस्थात्मने क्रों
ह्रीं आँ शिखायैवषट् ।
आँ ह्रीं क्रों वचनादानविसर्गानन्दात्मने क्रों ह्रीं आं कवचाय हूं ।
आँ ह्रीं क्रों मनोबुद्ध्यहंकारचित्तात्मने क्रों ह्रीं आं नेत्राय वषट् ।
आँ ह्रीं क्रों हंसप्राणात्मने क्रों ह्रीं आं अस्त्राय फट् ।
एवमङ्गानि विन्यस्य ध्यायेत् शास्त्रोक्तमार्गतः ।।१३(अ)।।

आँ ह्रीं क्रों श्रीं यं रं लं वं शं षं हं ।
देवदत्तस्य जीव इह स्थितः देवदत्तस्य सर्वेन्द्रियाणि
वाङ्मना हंस प्राणा इहायान्तु स्वाहा ।
यं रं लं वं शं षं सं हं श्रीं ह्रीं क्रों आँ
प्राण- प्रतिष्ठो (ऽ) यमुक्तः । सान्निध्यक्षतक्षणात् (?) दलेषु
विन्यसेद् । आदिक्षांतवर्णः संहिताकल्पः ।
यं धू (?) आर्चिषेनम् (?) । रं ऊष्मायैः । लं जुलिन्यैः ।
वं ज्वालिन्यै । दं विस्फुल्लिंगिन्यै वाहनायै ।

शं श्रियै । सं स्वरूपायै । लं हव्यवाहायन्यै (°वाहायै) ।
क्षं कव्यवाहायै विन्यसे (त्) ।
देशकलापावकस्य यथाक्रमं तन्मयं
वाङ्मनोदेहं ध्यात्वा मन्त्रं जपेच्छनैः स्वरूपं ।
कटार्ण (?) कमले कूटमिमं ध्यात्वा तद्रुवं (तद्ध्रुवं)
स्वशत्त्ययालिङ्गितं भानुं ध्यायेच्चिरमनन्यधीः ।
पद्मयुग्मं च विभ्राणं हस्ताभ्यां रक्तवाससम् ।
प्रसन्नवदनं चारुं किरीटादिविभूषितम् ।।१४।।

भक्तानां धर्मार्थकामार्थासाधनै परं प्रभुम् ।
इति (त)द्रूपमात्मानं चिन्तयित्वा पुनर्न्यसेत् ।।१५।।

क्लीं मं सूर्यमण्डलाय वसुप्रदद्वादशकलायुक्ताय नमः ।
अनेनैवं प्रविन्यस्य कुर्याद् आवाहनं पुः(पुनः) ।
ओं ह्रीं ह्रीं समार्तण्डभैरवाय प्रकाशशक्तिसहिताय
आगच्छागच्छ हुं स्वाहा ।
पूर्ववन् मन्त्रवर्येण कुर्यात् प्राणप्रतिष्ठकं
(प्राणप्रत्तिष्ठाम् ।)
ध्यायेच् चापि यथान्यायं तेजो मडंलधारिणाम् ।।१६।।

तत् कलाश्चत्यसे (?) देवि कादिमंत अर्णपत्रके (?) ।
कं भं तापिन्यै नमः । खं वं तापिन्यै (नमः) ।
गं फं मरीच्यै घं पं मरीच्यै, ङं नं ज्वालिन्यै, चं घं रुच्यै (नमः)
[36a] छं दं सुषुम्णायै जं थं गदायै दं तं विश्वायै
त्रं णं बोधिन्यै टं ढं धारिण्यै ठं डं क्षमायै(नमः)
सौरकलां देवि दलद्वादशके न्यसेत् ।
तदात्मकं स्मरन् देहं जपेद् बीजं महेश्वरि ।।
विशुद्धे षोडशदले सुसितं (?) बीजमात्मवित् ।
ध्यात्वा तदुद्भवं सोमं कलाषोडशसंयुतम् ।।
वर्षं तममृतं ध्यायेत् स्वशक्त्यालिङ्गितं प्रिये ।
प्राणानपि प्रत्तिष्ठाप्य पूर्वोक्तमनुना पुनः ।।

ओं सोमाय नमः । आगच्छागच्छ स्वाहा ।
आवाह्य अनेन मंत्रेण ध्यात्वा तन्मध्यमीश्वरि (तन्मध्ये ईश्वरि)
पत्रेषु स्वरदीप्तेषु कलाषोडशकं न्यसेत् ।।
सौं डं सोममण्डलाय कामप्रदषोडशकलात्मने नमः ।
अनेन देवि मन्त्रेण मध्ये तन्मण्डलं न्यसेत् ।
अमृतायै नमः । आनन्दायै नमः ।
ईं पूषायै । ईं तुष्टौ । ईं पुष्टौ । कुं रत्यै । ऋं कृत्यै ।
ॠं ॠं शित्यै । लृं चन्द्रिकायै । ॡं कान्त्यै । एं ज्योत्स्नायै ।
ऐं श्रियै । ॐ प्रीत्यै । औं गदायै नमः ।
अं पूर्णायै । अः पूर्णामृतायै (नमः) ।
कलाः सुधा निभाः सौम्याः षोडशैवं प्रविन्यसेत् ।
एवं त्रिमण्डलन्यासामुक्तं देवि प्रसिद्धये ।
कण्ठाधारपर्यन्तं भ्रूमध्ये ब्रह्मरन्ध्रके ।
डाकिन्याद्या न्यसेद् देवि योगिनीः सर्वसिद्धिदा ।।
सप्तधारेषु संचिन्त्य सप्तवर्णानि च क्रमात् ।
स्वकूटर्ज्वालितान्येव तत्संभृताश्च देवताः ।।
स्मृत्वा न्यासं पृच्छ वीतदेहस्य नवताप्तये ।
डाकिन्ये इति कर्णिकायां प्रविन्यसे (त्) ड म ल वर युँ
तत्कूटं रक्तवर्णं (च) ध्यात्वा तत्कूट(सं) भवाम् ।
काकिनीं भावयेद् देवि ततो दलेषु विन्यसेत् ।।
आं अकर्णिकायां प्रभृतायै (नमः) ।
आं आकर्षिण्ये नमः ।
इं इन्द्रायै नमः ।
ईं ईशान्यै नमः ।
ओं (उं) उमायै नमः ।
ऊं ऊर्ध्वकेश्यै नमः ।
ऋ ऋधायै नमः ।
लृं लुकायै नमः ।
ॡं लूषायै नमः ।

एं एकवीरायै नमः ।
ऐं ऐश्वर्याय नमः ।
ॐ ॐ काराय नमः ।
औ औषधायै नमः ।
अं अम्बिकायै नमः ।
अः अक्षरायै नमः ।
एवं दलेषु विन्यस्य मध्ये भूयः प्रविन्यसेत् ।
पूर्वोक्तन्यासमार्गेण ध्यात्वा देवंश -(स)- शक्तिकाम् ।।
डां डीं डं डं डै डौं डः कमलवायूं डाकिनीनां रक्ष मत्व (त्वम्)
चं रक्ष रक्ष सर्वशत्रुवसंकरि (°वशंकरि) देवि
नमश्चामुण्डे वरदे विच्चे ।
सक्षमलं व्यूह सक्षमल वयं (???)
एं क्लीं क्षौं श्रीं हंसानन्दनाथश्रीपादुकां पूजयामि ।
क्षौः क्लीं ऐं डां डाकिन्यै नमः इति मध्ये भूयः प्रविन्यसेत् ।
र म ल व र यूं एतत् कूटं रक्तवर्णं अनाहतपद्मे स्मरेत् ।
तत्कूटजनितां देवि शंकिनी पूर्व(व)त् स्मरेत् ।
तद्दलेषु न्यसेद् देवं न्यस्य तन्नामपूर्वकं राकिन्यै नमः इति ।
विन्यस्यैवं प्रविन्यसेत् ।
कं कालरात्र्यै नमः ।
खं खतितायै नमः ।
गं गायत्र्यै नमः ।
घं घण्टाकारिण्यै नमः ।
टं टर्णायै नमः ।
चं चामुण्डायै नमः ।
छं छायायै नमः ।
फं फंकारिण्यै नमः ।
उं ज्ञानस्वरुपिण्यै नमः ।
टं टंकहस्तायै (नमः) ।
ढं ढंकारिण्यै नमः ।

एकं भानुं दले न्यस्य पुनर्मध्ये च विन्यसेत् ।
ध्यात्वा पूर्वोक्तविधिना यथावद् विजितेन्द्रियः ।।
रीं रीं रूं लूं रैं रौं रः रमलवरयूं राकिनी
मां रक्ष रक्ष ।
[37a] रक्ष सर्वतत्येत्यादि (?) पूर्ववन् नित्यानन्दनाथश्री-
पादुकां पूजयामि ।
शं शाकिन्यै नमः । इति मध्ये देवि पुनर्न्यसेत् ।
मणिपूरकमध्ये तु लां लाकिन्यै (इति) वद् विन्यसेत् ।
डं डामर्यै नमः ।
तं तामस्यै (नमः)
थं स्थाणव्यै नमः ।
पं पार्वत्यै नमः ।
फं फट्कारिण्यै नमः
दलेषु दशसु न्यस्य भूयो विन्यसेत् सुधीः ।
लं लाकिन्यादि पूर्ववत् मन्मां रक्ष................
छानन्दनाथ (श्रीपादुकां पूजयामि)
श्री लां लाकिन्यै नमः
नमो मध्ये न्यसेत् भूयो(ऽ)पि पार्वति ।
स्वाधिष्ठाने च कां पूर्वं काकिन्यै च नमो न्यसेत् ।
पूर्ववत् ध्यानयोगेन ध्यात्वा षट्पत्रके न्यसेत् ।
वं वधिन्यै (नमः) ।
भं प्रकाल्यै नमः ।
मं मायायै (नमः) ।
यं यशस्विन्यै (नमः) ।
रं रमायै नमः ।
लं लम्वोष्ठ्यै नमः
एवं विन्यस्य पत्रेषु कर्णिकायां न्यसेत् ।
काक्रीमित्यादि पूर्ववत् मन्मेदसं रक्ष रक्ष ।
भोगानन्दनाथश्रीपादुकां (पूजयामि)

कां काकिन्यै नमो। तं च मंत्रमध्ये पुनर्न्यसेत् ।
मूले चतुर्दले पद्मे सां साकिन्यै नमो न्यसेत् ।
वं वरदायै संश्रियै नमः
षं षडायै (नमः)
सं सरस्वत्यै नमः ।
एवं पत्रेषु च (वि) न्यस्य मध्ये देवि प्रविन्यसेत् ।
सां सीमित्यादि पूर्ववत् मदस्थि रक्ष रक्ष ।
वीरानन्दनाथश्रीपादुकां पूजयामि ।
काकिन्यै (च) पुनर्मन्त्रं नमो (च) तं मध्यतो न्यसेत् ।
भ्रूमध्ये द्विदले विभां भाकिनि(भाकिनीं) न्यसेत् ।
हं हं समप्रै (?) नमः ।
क्षं समावत्यै नमः ।
दलद्वये च विन्यस्य ध्यात्वा पूर्वोक्तमार्गतः ।
शं हीमित्यादि पूर्ववत् तन्मे मज्जां शुक्लं (शुक्रं) रक्ष रक्ष ।
मु(?)स्वानन्दनाथ श्रीपादुकां (पूजयामि)
एवं विन्यस्य वै मध्ये भां भाकिन्यै नमः ।
तथा यां यक्षिभ्यै नमः ।
इति ब्रह्मरंध्रे प्रविन्यसेत् ।
सर्वाभ्यो योगिनीभ्यश्च नमोन्तं परितो न्यसेत् ।
पूर्वोक्तमालामनुना भ्रू मध्ये (?) देवि प्रविन्यसेत् ।
यां यीमितवत्यादि पूर्ववत् मत्प्राणशक्तिं रक्ष ।
परमशिवनाथश्रीपादुकां (पूजयामि) ।
यक्षिण्यै नम (:)।
इत्यन्तं यामि(यीमि)त्यादि पुनः स्थाप्य प्राण प्रतिष्ठामन्त्रं च प्रत्येकं विन्यसेत्
शिवे पुनः पदान्तं मस्तकादिपादावधि महामन्त्रेण विन्यसेत्
न्यासस्यास्य समाप्तये ततः खण्डं गं विन्यसेत ।
प्रोक्तस्थानेषु साधकः हं स्थिरश्च क्षकावर्म (?)
नेत्राष्टद्धिद्योर्ध्वं (?)

को त्रि ह्येकदशक द्वि-त्रि- मगुंलै (अंगुलै) विसेत् (विशेत्)
व्योमात्मानं तं विद्वंत (?) नमः पदमुदीरयेत् ।
चिरं कस्वान्तस्वद्रीशा (?) केवलाः परिकीर्तिताः ।
भानुः-स्वरयुतः पश्चात् आषाढो सो(ऽ)नलार्थतः।
भादि-खादिक्षकारादिः त्रिविशु विसर्गवान्.। (?)
विसर्गान्तान्तगोपनः स्वङ्गीनेत्रविभूषितः ।
परमेश्वरि शव्दान्ते (?) तथा परमकर्णिकाः ।।
डणिके पूर्वबीजान्तो हृन्मन्त्रः परिकीर्तितः ।
व्योमानलेन्दु वामाक्षि बीजान्तो विश्ववन्दिते ।।
पदमुक्त्वा ह दे वर्णः स्वरविद्याधिपे पदं ।
लोहिताग्नियुतो हादि रिकाराद्यौ त्रिरेव च ।।
वीथौ (?) तदम्बिके पूर्णि (?) पूर्वबीजः शिखो मनुः ।
मोमा तलार्शिवि (?) हन्तो बीज सीयोग (?) विग्रहे ।।
[38a] पदमुक्त्वा महावर्णौ (?) वायुः सद्योगिनि द्वयं ।
काले त्रिनेत्रसन्दीप्तो रास्वादी (?) पदमुच्चरेत् ।।
सद्यः पञ्चस्वरयुतो प्रथमो वह्निवर्णकः ।
लोहितो योति (योनि)संश्लिष्टौ मदघूर्णितलोचने ।।
रक्ष मां रक्ष खं वह्नि रक्ष विन्दुयुतां शिखाम् ।
आकारौकाराविन्द्राग्नि मन्त्रं द्वि-त्रयं वदेत् ।।
महामाये पदं प्रोक्तो मेषो मेरुधिग्रक्षराः ।
स मेष शेष शेषा हि (?) वह्नियुक्तोऽसिरेव च ।।
शांभोभौवं त संयुक्तौ द्विरन्दोत्यो दृगन्वितः (?) ।
मुमाकान्तो दृशां दीप्तौ कालो व्योमद्वितीयवान् (?) ।।
द्विरंडौ भौत्विग्युतौ (भौतिकयुक्तौ=एऐं) रविवर्णौ (अं ख फ र)
तत परम
लोहितो(ऽ)नन्तभूवायुकलो(ऽ)नन्तेन्दुरेव च ।।
पालायन्ते(पालीशान्ते = i.e. य) द्य बीजान्तो क च चाणुरुदीरितः ।
हरानुग्रहविद्वन्ते (विन्वन्ते) प रे पदमुदीरयेत् ।।
परापरमयेवार्याः परमार्थनये पुनः ।

परमेश्वरीपदं भूयः पश्चात् पाहि पदं पुनः ।।
मां माङ्गल्यप्रदे सर्वबीजान्तो नेत्रमन्त्रकम् (ई औ) ।
व्योमोग्नि कादि बीजान्तो चण्डिचण्डायुधे पदम् ।।
चण्डेश्वरि चन्द्र भूय : चंकाराति निषूदति ।।
महासंहारशब्दान्ते चण्डिके रक्ष रक्ष माम् ।।
पूर्वं बीजयुतो मन्त्रो ह्यस्त्राख्य परिकीर्तितः ।
एते मन्या महेशानि षडङ्गानां मयोदिताः ।।
यै (ये) साधयन्ति योगीन्द्रा वाञ्छितं नात्र संशयः ।
एत(न्) न्यासं महेशानि कीर्तितं योगिपूजितंम् ।।
त्रिकालं विन्यसेद् देहि (देवि) युगद्वत्रिकारकं (द्वात्रंशकारकम्) ।।
षण्मासा (द्) देवता सत्यं भैरवाभो भवेद् ध्रुवम् ।।
द्विवर्षात् कामरूपत्वं जायते नात्र संशयः ।
विस्मुना (विस्मिता) च पुरा न्यस्तं न्यासं सर्वार्थसाधकम् ।।
तेन देवि नृसंहादि धत्ते रूपममोघधृ ।
अमोघतां याति शिवे तस्य धाग (?) कदाचन ।।
तस्मात् सर्वप्रयत्नेन न्यसेद देहास्थिराप्तये ।
न व्याधिर्न जरामृत्युर्न चैवान्ये विभीषकाः ।
तं दृष्टमपि शक्ताः स्युर्न्यासो यं वज्रपञ्जरः ।।

।। इति श्रीमत्स्येन्द्रसंहितायां त्रयोदशः पटलः ।।

।।चतुर्दशः पटलः।।

[38a] ईश्वर उवाच —

अथ देवि प्रवक्ष्यामि विद्यां खेचरीसंहिताम् ।
यथा विज्ञायते (अ)भ्यासात् लोके (ऽ)स्मिन्नजरामरः ।।१।।

मृत्यु-व्याधिजराग्रस्तं दृष्टं विश्वमिदं प्रिये ।
वुद्धि (बुद्धिं) दृढतरां कृत्वा खेचरीं तु समाश्रयेत् ।।२।।

जरामृत्युगदघ्नीयां खेचरीं वेत्ति भूतले ।
ग्रन्थतश्चार्थतश्चापि तक्षया (तत् क्षयः) सप्रयोगतः ।।३।।

तं देवि सर्वभावेन गुरुं मत्वा समाश्रयेत् ।
दुर्लभा(म्) खेचरी(म्) विद्या(म्) तदभ्यासं च दुर्लभम् ।।४।।

अभ्यासमेलनं चैव युगपन्नैव सिध्यति ।
अभ्यासमात्रविरतो न विन्देतेह मेलकम् ।।५।।

अभ्यासाल्लभते देवि जन्मजन्मान्तरे क्वचित् ।
मेलने भुजगानां च जन्मान्ते तु न लभ्यते ।।६।।

अभ्यासं बहुजन्मान्ते कृत्वा सद्भावसाधितम् ।
मेलके लभते देवि योगी जन्मान्तरे क्वचित् ।।७।।

तदा (यदा) तन्मेलकं कर्म तदा शिवत्वमाप्नोति (आप्नुयात्) ।
विमुक्तिः (विमुक्तिं) संसृतिवृत्तात् लभते परमेश्वरि ।
तदा तत् सिद्धिमाप्नोति तदुक्तं शास्त्रसंततौ ।।८।।

ग्रन्थतश्चार्थ(त)श्चैव लभते मेलकं तदा ।
तदा शिवत्वमाप्नोति विमुक्तः संसृतिवृत्तात् ।।९।।

[39a] शास्त्रं विना समारोढुं गुरवो(ऽ)पि न शक्नुयुः ।
तस्मात् सदुर्लभतरं लभ्यं शास्त्रमिदं प्रिये ।।१०।।

यावन् न लभते (लभ्यते) ग्रन्थस्तावद गां पर्यटेदिमाम् ।
यदा स लभते (लभ्यते) देवि तदा सिद्धि करे स्थिता ।।११।।

न शास्त्रेण विना सिद्धि रटतो(ऽ)पि जगत् त्रये ।
तस्मान् मेलकदातारं शास्त्रदातारमीश्वरि ।।१२।।

तदभ्यासप्रदातारं शिव(म्) मत्वा सदा जपेत ।
तन्त्राश्च बहवो देवि मया प्रोक्ता (:) सुरार्चिते ।।१३।।

न तेषु खेचरीसिद्धिराख्याता मृत्युनाशिनी ।
महाकालं च मार्तण्डं विवेकाद्यं (?) च शाभरं
(शांबरम् ?)।।१४।

विशुद्धेशरसंज्ञं (?) च तथा वै जालशं (योगिनीजालं) वरम् ।
एतेषु तन्त्रवर्येषु तदभ्यासप्रकाशितम् ।।१५।।

क्वचित् स्पृष्टं तथास्पृष्टं क्वचित् तं मेलकादिकम्।
अस्मिन् तन्त्रे वरे दिव्ये मेलकादि प्रकाशितम् ।।१६।।

यदज्ञेयं भवेत् किञ्चि(द्) दुर्ज्ञेयं खेचरीमते ।
ततः सम्यगिहास्माभिस्तव देवि प्रकाशितम् ।।१७।।

तस्माच्छास्त्रं प्रलभ्येत् मयोक्तमिदमद्भुतम् ।
गोपनीयं सुगुप्तत्वा(न्) न सर्वत्र प्रकाशितम् ।।१८।।

मन्मुखाम्बुरुहाज् जातं यस्तु शास्त्रामृतं वदेत् ।
स एव हि गुरुः सत्यमर्थतो वेत्ति यः पुनः ।।१९।।

स चाधिकसमाख्यातो न गुरुस्तेन चाधिकः।
लब्धा शास्त्रमिह (शास्त्रमिदं) गुह्यं अन्येषां न प्रकाशयेत् ।।२०।।

सुविचार्य प्रवक्तव्यमेकमार्गोपजीविना ।
षट्पदं परसं (परमं) शास्त्रं यथा तथा प्रकाशयेत् ।।२१।।

स शीघ्रं भक्ष्यते देवि योगिनीभिः शिवाज्ञया ।
ग्रन्थिर्नोद्ग्रन्थयेदस्य विना कौलिकतर्पणात् ।।२२।।

पूजितं सुभवस्रस्यं (सुमनस्रक्षं) दिव्यधूपसुधूपितम् ।
श्रावणेद् (श्रावयेद्) विजने स्थाने योगिने योगशालिने ।।२३।।

यस्मिन् (न) पूजितं शास्त्रं इदं तिष्ठति विग्रहे ।
तत्राग्निरुद्वहारात्रिपीडा भवति निश्चितम् ।।२४।।

यत्रेमं (यत्रेदं) पूजितं ग्रन्थं गृहे तिष्ठति पार्वति ।
तत्र सर्वार्थदायिन्यौ (° दायिन्यः) वसन्ति कुलदेवताः ।।२५।।

तस्मात् सर्वप्रयत्नेन गोपनीयं विजानता ।
यो(ऽ)स्मिन् योगी मयोक्तानि संसिद्धानि समीहते ।।२६।।

स योगी सर्वभावेन गोपये(त्) पुस्तकं त्विदम् ।
अहं तस्तु (तत्र तु) गुरु देवि यशस्ते (यत्रास्ते)
पुस्तकं स्वयम् ।। २७।।

गुणा(न्) श्रृणु महेशानि पुस्तकस्य च रक्षणे ।
प्रकटं च मया प्रोक्तं इदानीं खेचरीं श्रृणु ।।२८।।

यत्रास्ते च गुरुर्देवि दिव्ययोगप्रसाधकः ।
तत्र गत्वा च तेनोक्तां विद्यां संगृह्य खेचरीम् ।।२९।।

तेनोत्त्का सम्यगम्यासं कुर्याद् आदावतन्द्रितः ।
विद्यां च खेचरीं देवि प्रवक्षे (प्रवक्ष्ये) योगसिद्धिदाम् ।।३०।।

न तया रहितो योगी खेचरीं सिद्धिभाग् भवेत् ।
खेचयो (खेचर्या) खेचरीं युञ्जन् खेचरीबीजं पूर्वया ।।३१।।

खेचराधिपतिर्भूत्वा खेचरेषु सदा वसेत् ।
खेचरावसथं वह्निरह्नि (°रवि) मण्डलभूषितम् ।।३२।।

व्याख्यातं खेचरीबीजं तेन योगः प्रसिद्धयति ।
मस्तकारख्यो महाचण्डाशिविवह्निक् वज्रमृत् (??) ।।३३

पूर्वं बीजयुता विद्या व्याख्याता ह्यतिदुर्लभा ।
षडङ्गविद्यां वक्ष्यामि तथा षट्स्वरभिन्नया ।।३४।।

कुर्याद् देवि यथान्यासं सर्वविद्यामिहेतवे (° विद्याप्तिहेतवे) ।
[40a) सोमेशान् नवमं वर्णं प्रतिलोमेन चोद्धरेत् ।।३५।

तस्यास्त्रिंशकमाख्यातम् अक्षरं चन्द्ररूपकम्।
तस्मादप्यष्टकं वर्णं विलोमेन् वरं (?) प्रिये ।।३६।।

तथा तत्त्वं च मे देवि तदादिरपि पञ्चमम् ।
इन्द्रो(ऽ)पि बिन्दुसंभिन्नं कूटो(ऽ)यं परिकीर्तितम् ।।३७।

गुरूपदेशलभ्यं सर्वयोगप्रसिद्धिदम् ।
यत्तस्य देवजा माया विरुपा कारणाश्रया ।।३८।।

स्वप्नो(ऽ)पि न भवेत् तस्य नित्यं द्वादशजाप्यतः ।
यं (यः) इमां पञ्चलक्षाणि जपेद् सुनियंत्रितम् ।।३९।।

तस्मात् श्रीखेचरीसिद्धिः स्वयमेव प्रवर्त्तते ।
नश्यन्ति सर्वविघ्नानि प्रसीदति च देवता ।।४०।।

वलीपलीत (वलिपलित) नाशश्च भविष्यति न संशयः ।
एवं लब्ध्वा महाविद्यामभ्यासं कारयेत्ततः ।।४१।।

अन्यथा क्लिश्यतो देवि न सिद्धिं खेचरीपदे ।
यदभ्यासविधौ देवि लभेद् यश्च सुधामयम् ।।४२।।

ततः संमेलकादौ च लब्ध्वां विद्यां समुञ्जयेत ।
नानया सहितो देवि न क्वचित् सिद्धिभाग्भवेत् ।।४३।।

यदिदं लभ्यते शास्त्रं तदा विद्यां समाश्रयेत् ।
ततस्तन्त्रोदितां सिद्धिमाशु शलनते (संलभते) प्रिये ।।४४।

तालुमूलं समुत्कृष्य सप्तवासरमात्मवित् ।
स्वगुरूक्तप्रकारेण मलं सर्वं विशोधयेत् ।।४५।।

स्नुहीयंत्रनिभं शस्त्रं सुतीक्ष्णं स्निग्धनिर्मलम् ।
समादाय ततस्तेन रोगमात्रं समुच्छिनत्ते ।।४६।।

छित्त्वा (?) सैन्धवं पश्चायाभ्यां चूर्णिताभ्यां प्रघर्षयेत् ।
पुनः सप्तदिने प्राप्ते रोगमात्रं समुच्छिनत्ते ।।४७।।

एवं क्रमेण षण्मासं नित्योयुक्तः समाचरेत् ।
षण्मासाद् रसनामूलशिराबन्धः प्रणश्यति ।।४८।।

अथ वागीश्वरीधाम शिरोवस्त्रेण वेष्टितम् ।
शनैरुत्कर्षयेद् योगी कालवेलाविधानवित् ।।४९।।

पुनः षण्मासमात्रेण नित्यसघंषर्णात् प्रिये ।
भ्रूमध्यावधि चा भेति (?) तिर्यग् वर्णाविलावधि ।।५०

अधस्वा (अधस्तात्) चिबुकं मूलं प्रयाति क्रमकारितम्।
पुनः संवत्सराणां तु त्रितये देवि लीलया ।।५१।।

केशान्तमूर्ध्वक्रमतिर्यक् तरवावधि (?) प्रिये ।
अधस्तात् कण्ठकूपान्त पुनर्वर्षत्रयेण तु।।५२।।

ब्रह्मरन्ध्रं समावृत्य तिष्ठति अमरवन्दिते ।
तिर्यक चूलीतले अधः कण्ठविलावधि (?) ।।५३।।

शनैः शनै मस्तकाद्य महावस्त्रं कपाटधृक् (?)।
पूर्वबीजयुता विद्याप्यरव्याता याति दुर्लभा ।।५४।।

तस्याः षडङ्गं कुवीत तथा षट् द्वारभिन्नया ।
कुर्याद् देवि यथान्यायं सर्व सिद्ध्याप्तिहेतवे ।।५५।।

शनैः शनैः प्रकर्तव्यमभ्यासं युगपन् नहि।
युगपद् यश्चरेद् अस्य शरीरं विलयं व्रजेत् ।।५६।।

तस्या शनैः शनैः कार्यमभ्यासं वरवर्णिनि।
यदा च बाह्यमार्गेण जिह्वा ब्रह्मविलं व्रजेत ।।५७।।

तदा ब्रह्मार्गलं देवि दुर्भेद्यं त्रिदशैरपि ।
अंगुल्यग्रेण संघृष्य जिह्वा मंत्रं निवेशयेत् ।।५८।।

एवं वर्षत्रयं कृत्वा ब्रह्मद्वारं प्रविशति ।
ब्रह्मद्वारं प्रविष्टे तु सम्यक् मन्थनमारभेत् ।।५९।।

मन्थनेन विना केचित् साधयन्ति विपश्चितः ।
खेचरीमंत्रसिद्धस्य सिद्धयते मन्थनं विना ।।६०।।

[41a] जपं च मन्थनं चैव कृत्वा शीघ्रं फलं लभेत्।
स्वर्णजां रोप्यजां वापि लौहजां वा शलाकिकाम्।।६१।।

नियोज्य नासिकारन्ध्रे दृढस्निन्धेन तन्तुना ।
प्राणान् निरुध्य हृदये दृढमासनमास्थितः ।।६२।।

शनैः समन्थनं कुर्यात् भ्रूमध्ये न्यस्य च चक्षुंषी ।
षण्मा(स)मन्थनावस्था तावतैव प्रजायते ।।६३।।

सम्यक् संरुध्य जीवस्य योगतस्तन्मयात्मनः ।
यथा सुषुप्ति वलिना (?) यथाभावस्तथा भवेत्।।६४।।

न सदा मन्थनं (प्र)शस्तं मासि मासि (मासें मासे) समाचरेत्
सदा रसनया देवि मार्गं तु परिसंक्रमेत।।६५।।

एवं द्वादशवर्षान्ते संसिद्धि (संसिद्धः) परमेश्वरि ।
शरीरे सकलं विश्वं पश्यत्यात्माविभेदतः ।।६६।।

ब्रह्माण्डे यत् महामार्गं राजदन्तोर्ध्वमंडले ।
भ्रूमध्ये तं विजानीयात् भ्रुकुटं सिद्धिसेवितम् ।।६७।।

चणकाङ्कुरसंकाशं तत्र संयोजयेन्मनः ।
लिहेत् रसनायातं तु स्रवन्तं परमामृतम् ।।६८।।

शनैरभ्यासमार्गस्य (° मार्गेण) चतुवर्षं पिबेत् प्रिये ।
वलीपलितनाशश्च संसिद्धि (:) परमा भवेत् ।।६६।।

सर्वशास्त्रार्थवेत्ता च जीवेद् वर्षसहस्रकम् ।
कन्याविलमहीपादरसवादादि सिद्धयः ।।७०।।

योगिनः संप्रवर्त्तन्ते पञ्चवर्षेण पार्वति ।
सम्यग् रसनया योगी स्रवन्तममृतोदकम् ।।७१।।

पीत्वा पीत्वा विशेत् व्रतस्यो द्वादशात्मकम् ।
अनेनाम्यासयोगेन वलीपलितवर्जितः ।।७२।।

वज्रकायो महायोगी वर्षलक्षं प्रजीवति ।
दशनागसहस्राणां बलेन सहितः प्रिये ।।७३।।

स दूरदर्शनः चैव दूरश्रवणमेव च ।
निग्रहानुग्रहे शक्तिः सर्वत्र बलवान् भवेत् ।।७४।।

एतद्याः सिद्धयो देवि भ्रूमध्ये संभवन्ति हि।
आकाशे रसनां कृत्वा दन्तपक्तिं न पीड्येत् ।।७५।।

काकचञ्चुपुटं वक्त्रं कृत्वा तद्मृतं पिवेत् ।
भानुवत्सरतः सत्यं जरामरणवर्जितम् ।।७६।।

खेचरत्वमवाप्नोति जीवत्या चन्द्रतारकम्।
पादुका - खड्ग - वतोलः (वेताल?) सिद्धिद्रव्यमनःशिला ।।७७

अंजनं विचरश्चैव खेटकं यक्षिणी तथा ।
यत्किञ्चित्सिद्धम(न्यच्च) विद्याते (विद्यते) भुवनत्रये ।।७८।।

तत्सर्वमेव सहसा साधयेत् साधकोत्तमः ।।७६।।

।।इति मत्स्येन्द्रसंहितायां चतुर्दशः पटलः।।

। ।पञ्चदशः पटलः । ।

[41b] ईश्वर उवाच —

यत्र ब्रह्मार्गलं द्वारं दुर्विज्ञेयं महेश्वरि ।
कला चतुर्क्व (चतुष्कं ?) तत्रस्थं चतुर्वक्त्रात्मकं परम् । ।१ । ।

पूर्वभागे कृता नाम गुप्ता दक्षिणगोचरा ।
शिवा पश्चिमदिवभागे परापरसिवोत्तरे (° शिवोत्तरे) । ।२ । ।

तद् द्वारं रसनाग्रेण भित्त्वा पूर्वकलामृतम् ।
यदा पिबति वै योगी मासार्धेनाधिपो भवेत् । ।३ । ।

यदा गुप्तामृतं दक्षे योगी रसनया लिहेत् ।
मासादेव न सन्देह (:) साक्षाद् अर्थेश्वरोभवेत् । ।४ । ।

तत् पश्चिमकलाजातं शुद्धं पिबति जिह्वया ।
यदा तदा महायोगी मासात् कामेश्वरो भवेत् । ।५ । ।

उत्त(र)स्थकलाजातममृतं प्रपिबेद् यदा ।
तदासौ पारमेष्ठिनामाधिपत्यम् अवाप्नुयात् । ।६ । ।

तदूर्ध्वं मण्डले लीने ब्रह्मरन्ध्रे परामृतम् ।
यदा तदासौ पिबति जीवन्मुक्तः शिवो भवेत् । ।७ । ।

मासे मासे विधिं यदा द्वादशाष्टं (?) समाचरेत् ।
सर्वरोगविनिर्मुक्तः सर्वज्ञगुणपूरितः । ।८ । ।

[42a] जायते शिववद् योगी लोके(ऽ)स्मिन्नजरामरः ।
चतुष्ककलामृतं द्वापि पीत्वा पीत्वा महेश्वरि । ।९ । ।

ब्रह्मस्थाने तथा जिह्वां स नियोज्यामृतं पिबेत् ।
सुस्वादु शीतलं हृँद्यं क्षीरवर्णमफेलिनम् (?) । ।१० । ।

मासमात्रप्रयोगेण जायते शिववत् स्वयम् ।
द्विमासे सर्वशास्त्रार्थं सम्यग् जानाति पार्वति ।।११।।

स्वतन्त्रः शिववन् मासत्रये भवति वै शिवे ।
चतुर्मासे महेशानि सर्वज्ञत्वं प्रवर्तते ।।१२।।

पञ्चमासे महासिद्धिस्त्रैलोक्यमपि पश्यति ।
षण्मासे परमानन्दं गुणसद्भावपूजितः ।।१३।।

जायते नात्र सन्देहो जीवन्मुक्तः परावरे ।
सप्तमासे महाभूतपिशाचोरगराक्षसैः ।। १४।।

स ह संवर्त्तते नित्यं स्वेच्छया हृष्टमानसः ।
अष्टमे मासपर्याये देवैः सम्मेलनं भवेत् ।। १५।।

नवमे मास्यदृष्टत्वं सूक्ष्मत्वं चैव जायते ।
दशमे कामरूपत्वं सर्वलोकप्रकाशना ।। १६ ।।

एकादशे त्रिकालज्ञः सर्वलोकेश्वरः प्रभुः ।
जायते शिववद् देवि सत्यमेतन्मयोदितम् ।। १७ ।।

यत्र तुलीतलां प्रोक्तं केदारं प्राहुरीश्वरि ।
तत्र सौमकलाश्चाष्टौ विख्याता वीरवन्दिते ।। १८ ।।

Verse 19 missing

अमृता प्रथमा देवि द्वितीया मानदाह्वया ।
पूषा तुष्टिश्च ....रतिश्चैव धृतिस्तथा ।। २० ।।

शंखिनी चाष्टमी सर्वाः परामृतमहार्णवाः ।
तद् धामाभिमुखी जिह्वां यदा योगी करोति च ।। २१ ।

अष्टधा स्रवते तत्र तदा तुहिनसन्ततिः ।
तदा स्रवनसंयोगात् कलेवरनादक्षयः ।। २२ ।।

[42b] अष्टभिर्मासपर्यायैः खेचरत्वं प्रजायते ।
भ्रूमध्यं नाम यद्वाम (?)तत् प्रोक्तं सोममण्डलम् ।। २३ ।।

कलाचतुष्कं तत्रोक्तं परमामृतनिकेतनम् ।
चंकिकाख्या (?) च कान्तिश्च ज्योत्स्नाश्रीश्चेति नामतः ।। २४।।

तत्र जिह्वां समावेश्य पीत्वा पीत्वा समाविशेत् ।
देवि मासचतुष्केण जायते निरुद्रवः ।। २५।।

वज्रकायो भवेत् सत्यं तदास्रवनपाततः ।
तदूर्ध्ववज्रकन्दाख्यं शिलाखेचरमध्यगम् ।। २६।।

ललाटं तं विजानीयात् तत्र देवि कलात्रयम् ।
प्रीतिस्तथा गजापूर्णा (?) तत्र जिह्वां प्रवेशयेत् ।। २७।।

क्षीरधारामृतं शीतं स्रवन्तं जिह्वया पिबेत् ।
मासत्रयेण देवेशि सर्वव्याधिविवर्जितः ।। २८।।

अच्छेद्यः सर्वशस्त्रैश्च अभेद्यः सर्वलोकशैः (?)।
अचिन्त्यः सर्वविज्ञानैविरूपविषमान्वितैः ।। २९।।

भैरवाभो भवेत् सत्यं वज्रकन्दप्रभावतः ।
नासिकोर्धोधरोष्ठौ राजदन्तं (?) महापथां (?)।। ३०।।

तत्र पूर्णामृतं देवि शीतला च कलाह्वयां (?)।
सम्प्राप्य कुम्भकावस्थां रसनाग्रेण संस्पृशेत् ।। ३१।।

तत्र सञ्जायते (देवि) सुस्वादु शीतलं जलम् ।
स्वमनस्तत्र संयोज्य पिबेन्मासत्रयं व्रती ।। ३२।।

अजरामरतामेति सर्वव्याधिविवर्जितः ।
गुदबीजान्तरस्थानमाधारं परिकीर्तितम् ।। ३३।।

तत्र पञ्चकलाः प्रोक्ताः प्रगलत् परमामृताः ।
सुधासुधामयी प्रज्ञा कालघ्नी ज्ञानदायिकाः।। ३४।।

कला(:) पञ्चसुधाधारा(:) कीर्तिता(:)सर्वसिद्धिदाः ।
तत्रस्था परमा शक्तिः मायाकुण्डलिनी शिवे ।। ३५।।

[43a] तत्राकुञ्चनयोगेन कुम्भकेन सुरार्चिते ।
मूलशक्त्या समासाद्य तत्रगं शीतलामृतम् ।। ३६।।

सुषुम्णया समुन्नम्ग (समुन्नत्य?) स्वाधिष्ठानपङ्कजात् ।
वसुधा वृष्टि (:) संसिक्तं स्मरेद् ब्रह्माण्डकावधि ।। ३७।।

तत्रस्थम् अमृतं गृह्य शक्तिः श्रीकुण्डलीपराः ।
सुषुम्णामार्गमासाद्य ब्रह्मधाम तमीयुषी ।। ३८।।

मूलपञ्चकसंजाता सुधातृप्तिपरिप्लुता ।
आपादमस्तपर्यन्तं व्यापयन्तीं तनुं स्मरेत् ।। ३९।।

पञ्चमासप्रयोगेण पञ्चभूतजयं लभेत्।
शिवसाम्यो भवेत् सत्यं त्रिकालाभ्यासयोगतः ।। ४०।।

नाभिस्थानं हि देवि स्वाधिष्ठानं तदुच्यते ।
तत्र दिव्यामृतमयं कलात्रयमुदीरितम् ।। ४१।।

सूसुक्षां (सुसूक्ष्मा) परमाह्लादा विद्या चेति प्रकीर्तिता ।
पूर्ववत् कुम्भकावस्थां प्राप्य शक्तिं प्रयोध्य (प्रबोध्य च) ।। ४२।

पीत्वा ब्रह्माण्डपर्यन्तं स्नापयेद् यः स्वकां तनुम् ।
योगी त्रिमासपर्याये पूर्वोक्तं लभते फलम् ।। ४३।।

गुद-मेढान्तरं यद् वै वेणु दंकं (?) तदुच्यते ।
कलाचतुष्कं तत्रोक्तं परामृतरसात्मकम् ।। ४४।।

सुशीता च महातृप्तिः पलितघ्नी वलीक्षया ।
तत्र शक्तिं समुद्बोध्य पूर्ववत् प्लावयेत् तनुम् ।। ४५।।

चतुर्मासप्रयोगेण पूर्वोदितं फलं लभेत् ।
पिङ्गला-रवि-विवाह्माख्या (वाहाख्या) इडाख्या चन्द्रवाहिनी ।। ४६

विषवाहो खेर्बाहुः सुधावाहो निशाकरे ।
अभ्यासं सूर्यवाहाख्ये चन्द्रवाहे च शस्यते ।। ४७।।

धारणं चन्द्रवाहेन योगी कुम्भकमाचरेत् ।
शशिवाहेन एवं तु पूरयेदात्मनस्तनुम् ।। ४८।।

[4[illegible]] रविवाहेन चोत्सर्गः शस्यते देहवृद्धये ।
एतत् ते व्याहृतं देवि कलास्थानं च तद्गुणः ।। ४६।।

अतःपरं प्रवक्ष्यामि पराभूत - (परामृत-) महापदम् ।
वज्रकन्दे ललाटे तु प्रज्वलच् चन्द्रसन्निभम् ।। ५०।।

लं-गर्भं चतुरस्त्रं च तत्र देवः परः शिवः ।
देवतास्तमुपासन्ते योगिन्यः शक्तिसंयुतम् ।। ५१।।

चूलितले महादेवि लक्षं सूर्यसमप्रभम् ।
त्रिकोणमण्डलं मध्ये देवं लिङ्गात्मकं शिवम् ।। ५२।।

रं-गर्भमध्यगं देवि स्वशक्त्यालिङ्गितं परम् ।
देवतागणसजुष्टं भावयेत् परमेश्वरि ।। ५३।।

दक्षशंखे महाभागे षट्बिन्दुवलयान्वितम् ।
यं-गर्भं धूम्रवर्णं च तत्र देवं महेश्वरम् ।। ५४।।

लिङ्गाकारं स्मरेद् देवि शक्तियुक्तं गणावृतम् ।
वामशङ्खोर्ध्वं (?) चन्द्राभं स्वपद्मं मंडलं शिवे ।। ५५।।

वं-गर्भं टढ पक्ष्य (?) -मध्ये तत्र लिङ्गं सुधामयम् ।
गोक्षीरधवलाकारं शरच्चन्द्रायुतप्रभम् ।। ५६।।

स्वशक्तिसहितं सर्वदेवतागणसेवितम्।
एवं देवि चतुर्दिक्षु स्थानान्युक्तानि वै मया।।५७।।

तेषां मध्ये महावृत्तं हं -गर्भं तत्र पार्वति।
परमेशः परः शम्भुः स्वशक्त्या सहिता स्थिताः।। ५८ ।।

लिङ्गाकारो गुणयुतः सूर्यकोटि समप्रभः।
पृथिव्यधिपतिः भाले पश्चिमे सूर्यनायकः।। ५६ ।।

दक्षशङ्खे नीलप्रति (नीलपति ?) वामे जलपति (:) शिवः ।
मध्ये व्योमाधिपः शम्भु स्थानाः (?) पञ्चमयोदिता।।६० ।।

व्योमाधिपस्य देवस्य शिरोर्ध्वे चतुरङ्गुले।
ज्योर्तिमडंलमध्यस्थं कोटिचन्द्रसमप्रभम्।। ६२

[44a] दिव्यामृतमयं भाकं (भालं) मूलबन्धकवाटकम्।
ऊर्ध्वैरुर्ध्वं महाशैलमभेद्यममृतास्पदम्।। ६२ ।।

शीतलामृतमध्ये तु विलीनं लिङ्गमीश्वरि।
त्रसरेणुप्रतीकाशं कोटिचन्द्रसमप्रभम् ।।६३।।

हेयोपादेयरहितम् अज्ञानतिमिरापहम्।
अतीत्य यं च स्थानानि परतत्त्वोपलब्धये ।।६४।।

परामृतघटाधारं कवाटं कुम्भकान्वितम्।
मनसा सह वागीशीमूर्ध्ववक्त्रं प्रसारयेत् ।।६५।।

संरुद्धप्राणसंचारो योगी रसनयार्गलम्।
लीलयोद्घाटयेत् सत्यं संप्राप्य मनसा सह ।।६६।।

शीतलक्षाररसस्वादु तत्र क्षीरामृतं हितम्।
योगपानं पिवेन्मध्यं दुर्लमं विबुधैरपि ।।६७।।

तत् सुधातृप्तिसंतृप्तः परास्थाम् उपेत्यच।
उन्मन्या तत्र संयोगं लब्ध्वा ब्रह्माक (ब्रह्मण्ड)- कान्तरे ।।६८।

नादबिन्दुमयं मासं योगी योगेन भक्षयेत्।
एतद् रहस्यं देवेशि दुर्लभं परिकीर्तितम् ।।६९।।

सर्वज्ञेन शिवेनोक्तं यत्फलं शास्त्रसंततौ ।
तत्फलं लभते सत्यं पण्मासान् नात्र सशंयः ।।७०।।

[44 b] संप्राप्य सिद्धिसन्तानं योगी योगमपीश्वरि।
न वेत्ति तस्य वक्तव्यं न क्वचित् सिद्धिमिच्छता ।।७१।।

न जानन्ति गुरुं देवं शास्त्रोक्तान् समयांस्तथा
दंभकौटिल्यनिरतास्तेषां शास्त्रं न दापयेत् ।।७२।।

जिह्वामूले स्थितो देवि सर्वतेजमयो (ऽ)नलः।
तदग्रे भास्करश्चन्द्रो भालमध्ये प्रतिष्ठितः ।।७३।।

एवं यो वेत्ति देवेशि तस्य सिद्धि(:) प्रजायते।
मथित्वा मण्डलः वह्नेः समुद्बोध्य प्रयत्नतः ।।७४।।

उलसारद्रवितं (?) भालनं चन्द्रमण्डलम्।
भास्कराधिष्ठितो(ऽ)ग्रेण रसनेन (?) समाश्रयेत् ।। ७५।।

तच् चन्द्रागलितं देवि शीतलं तत्पयो(ऽ)मृतम्।
नासिकारन्ध्रनिर्यातं पात्रेण परिसंग्रहेत् ।। ७६।।

तेनाङ्गमर्दनात् सत्यं नाडीसिद्धि(:) प्रजायते।
गुदलिङ्गोहतं देवि निर्गतं चामरीरसम् ।। ७७।।

कलामृतं च संलोड्य संस्कृत्य चाधरारसैः।
तेनां(ग)- मर्दनं कृत्वा योगी लोके निरामयः ।। ७८।।

बलवान् जायते सत्यं बलीपलितवर्जितः।
जिह्वामूलं समूत्कृष्य तत्र जातं मदद्रवम् ।। ७९ ।।

स्वदेहे मर्दयेत् पूर्वाद् रसना वत्सरार्द्धतः।
चतुरगुंलवृद्धा च जायते नात्र संशयः।। ८० ।।

उत्कृष्य रसनामूर्ध्वे दक्षिणाङ्गुलिभिः शिवे।
वामहस्ताङ्गुलिभिश्च घंटिकां स्फोटयेच्छिवे ।। ८१ ।।

मथित्वा वामकं स्थानमूर्ध्ववक्त्रं शनैः शनैः।
त्रिकूटोर्ध्वं च वज्रान्त्यो (?) शिवस्थानं समाश्रयेत्।। ८२ ।

एषा ते खेचरी मुद्रा कथिता मृत्युनाशिनी।
सर्वसिद्धप्रदा देवि जीवन्मुक्तिप्रदायिनी।। ८३ ।।

।।इति मत्स्येन्द्रसंहितायां पञ्चदशः पटलः।।

।।षोडशः पटलः।।

ईश्वर उवाच —

एवमभ्यासशीलस्य तद्विध्नां (तत्तद्विघ्ना) भवन्ति हि।
भटभेदाश्च चत्वारो नटभेदास्तथैव च ।। १।।

अङ्गशोषः क्षुधालस्यं कंडदेहिविवर्णता (कण्डू देहविवर्णता)।
भटस्य प्रत्ययाश्चैते तेषां श्रृणु च भेषजम् ।। २।।

मनो निर्विषयं पुडका (?) त्रिमासम् अमरीरसम्।
देहमुद्वर्तये(त्) तस्य देहवृद्धिः प्रजायते।। ३।।

त्रिरुद्वर्त्तनकं कुर्यात् दिवारात्रौ तथैव च।
रसनामूर्ध्वमायोज्य वज्रकन्दपरोन्मुखीम्।। ४।।

तत्सुधां लिहतः सत्यं क्षुधालस्यं च नश्यति।
तत्सुधाममरीं देवि गृहीत्वा चाङ्गमर्दनात्।।५।।

[45a] स्वशरीरविवर्णत्वं कंडूत्वं च प्रणश्यति।
नभदेदाश्च (नटमेदाश्च) चत्वारो बहुधा संस्थिताः प्रिये। ६।।

नेत्ररोगो(ऽ)ङ्गशोषश्च दाहो भ.. त(स्त)थैव च।
भेदमेकं मया प्रोक्तं द्वितीयमधुना श्रृणु।। ७।।

दन्तरुक(°रुग्)-वाल्पसत्त्वं च देहलाघवनाशनम्।
तृतीयभेदं च तथा श्रृणु देवि महाज्चरः।। ८।।

शिरोरुक्श्लेष्मदोषश्च चतुर्थं सम्प्रधार्यताम्।
वमनं श्वासदोषश्च नेत्रान्धत्वं तथैव च।। ९ ।।

दुर्ज्ञया च तथा निद्रतिषां (निद्रा तेषां) श्रृणु च भेषजम्।
समूला छाससंभिन्नां (?)मुर्ध्वं कुंडलिनीं नयेत् ।। १० ।।

निश्चलामूर्ध्वगां जिह्वां कृत्वा कुम्भकमाश्रयेत्।
शक्तिशोभान् (?) महेशानि जलनादः प्रवर्तते ।। ११ ।।

यदा श्रृणोति तं नादं तदा मुक्तः स उच्यते।
चिन्तयेद् अमृतासिक्तं स्वदेहं परमेश्वरि ।। १२ ।।

अनेन देवि मासेन सर्वदोषैः प्रमुच्यते।
अनेनैव विधानेन द्विमासान्तं यदाचरेत् ।। १३ ।।

तदा श्रृणोति कर्णाभ्यां महागजवरध्वनिम्
पूर्ववच् चिन्तयेद् देहं द्वितीयैर्मुच्यते गदैः ।। १४ ।।

त्रिमासात् सिंहनादं च श्रुत्वा पूर्ववत् स्मरेत्।
तृतीयभेददोषैश्च मुच्यते नात्र संशयः ।। १५ ।।

मेघनादम् अघोराख्यं चतुर्थे मासि पर्ययेत्।
श्रुत्वा पूर्ववद् अभ्यस्य भ्रान्तै दोषैश्च मुद्यते (मुच्यते) ।।१६।।

एवं स्थिरमतिर्ध्यानम् अभ्यसेच्च द्विकालकम्।
साधयेत् प्रवृत्तः सत्यं जायते ह्यजरामरः ।। १७ ।।

भटदोषचतुष्कस्य नटदोषस्य चैव हि।
निवारणं मया प्रोक्तं भूयः श्रृणु नराधिपः[1] ।। १८ ।।

यो(ऽ)स्मिन् शान्ते परे तत्त्वे योगे योगी सुखात्मके।
प्रविष्टः सर्वतत्त्वज्ञः तस्य पादं नमाम्यहम्।। १९ ।।

[45b] प्रथमं चालनं देवि द्वितीयं मंथनं भवेत्।
तृतीयं पानमुद्दिष्टं चतुर्थं च प्रवेशकम् ।। २० ।।

तालुमूलं समुद्धृत्य जिह्वामुकर्षयेत् प्रिये।
चालनं तद् विजानीयाद् ब्रह्मार्गलविभेदनम्।। २१ ।।

1. Addressed to king of Cola by Matsyendranātha. Strangely this occurs in the dialogue between Śiva-Pārvatī.

तं वदन्ति....................
लोहकील- प्रवेशेन यथा मंथनमारभेत् ।। २२ ।।

मंथनं तद् विजानीयाद् योगिवृद्धिकरं प्रिये।
उदर्ध्योगतमाकाशे (?) जिह्वामूर्ध्वं प्रसारयेत् ।। २३ ।।

प्रवेशं प्राहुरीशानि योगसिद्धिप्रवर्तकम्।
ब्रह्मार्गलप्रभेदेन जिह्वासंक्रमणेन च।। २४ ।।

प्रत्ययः परमेशानि क्षणोर्ध्वात् संप्रजायते।
आदावानन्दभावत्वं निद्राहानिरतःपरम् ।। २५ ।।

संगमं भोजनं देवि स्वल्पमल्पं प्रजायते।
पुष्टिः सञ्जायते तेजोवृद्धिश्च भवति प्रिये ।। २६ ।।

न जरा न च मृत्युश्च न व्याधि(:) पलितं न च।
ऊर्ध्वरेता महेशानि अणिमादिगुणान्वितः।। २७ ।।

यदि निश्चलभावेन योगी भावं प्रसारयेत्।
तदा प्रोक्तान् इमान् सम्यक् फलान् लभति पार्वति ।। २८ ।।

जिह्वाग्रे श्री(श्च)वागीशा संस्थिता वीरवन्दिते।
जिह्वा मूलाधारे भागे बन्धमृत्युः प्रतिष्ठितः ।। २९ ।।

बन्धमृत्युपदं सर्वमुन्मूलय गणाम्बिके ।
तदग्रेण विशामोहं (विशाम्यहं) धाम श्रीशम्भुसंज्ञकम् ।। ३० ।

अनेन देवि योगेन मनसा साधिते चले।
उन्मन्या आवेशम् आयान्ति योगी तल्लयमाप्नुयात् ।। ३१ ।।

[46 a] लयस्य प्रत्ययः सद्यः संभवति अविचारतः।
जिह्वाग्रे मन आधाय दृशा तद्धाम लक्षयेत् ।। ३२ ।।

मूलासुषुम्णामार्गेण पवनं चोर्ध्वमानयेत्।
ब्रह्मधामगतो योगी मनः शून्ये निवेशयेत् ।। ३३ ।।

ध्यायेत् परतरं तत्त्वं हेयोपादेयवर्जितम्।
आकाशगङ्गास्रवीतं ब्रह्मस्थानात् सुशीतलम् ।। ३४ ।।

प्रपिवन् मासमात्रेण वज्रकायो भवेद् ध्रुवम्।
दिव्यकायो भवेत् सत्यं दिव्यवाग् दिव्यदर्शनः ।। ३५ ।।

दिव्यबुद्धिर्भवेद् देवि दिव्यश्रवण एव च।
जिह्वाग्रे कोटिचन्द्राभां वागीशीं परिभावयेत् ।। ३६ ।।

परामृतकलातृप्तां काचितां (?) लभते क्षणात्।
जिह्वाग्रे संस्थितां लक्ष्मीं परामृतविमोदतः ।। ३७।।

ध्यायन् योगी महेशानि योगसाम्राज्यमाप्नुयात्।
सहजा (:) पञ्च विख्याता (:) पिण्डे(ऽ)स्मिन् परात्मके।। ३८।।

यदा सञ्जायते देहे मातृदेहे(ऽ)पि नृक्षणात् (?) ।
तत्र सार्धं भवन्ति स्म देहे वृद्धिमुपेयुषिम्।। ३९ ।।

आद्या कुण्डलिनीशक्तिः प्रथमा सहजा स्थिता ।
द्वितीया सुषुम्णाख्या जिह्वा चैव तृतीयका ।। ४० ।।

तालुस्थानं चतुर्थं च ब्रह्मस्थानं च पञ्चमम्।
उन्नध्या (?) सहजा माया द्वितीये शहजे (सहजे) विशेत् ।। ४१

तृतीया सहजा मूर्धा चतुर्थं सहजा विशेत्।
चतुर्थं सहजा भित्वा सहजं पञ्चममभ्यसेत् ।। ४२ ।।

एतद् भेदं मया प्रोक्तं दुर्विज्ञेयं कुलेश्वरि।
मूलात् कुण्डलिनीशक्तिं सुषुम्णामार्गमागताम्।। ४३ ।।

लूतैकतन्तुप्रतिभां (प्रतिमं) कोटिसूर्यसमप्रभम्।
प्रविश्य घटिकामार्गे शिवद्वारार्गलं शिवे ।। ४४ ।।

भित्त्वा रसनया योगी कुम्भकेन महेश्वरि।
प्रविशेत् कोटिसूर्याभं धाम स्वायम्भुवं प्रिये ।।४५।।

[46 b] तत्रामृता महाम्भोधौ शीतकल्लोलमालिनी।
पीत्वा विश्रम्य च सुधां परमानन्दपूर्णया ।।४६।।

बुध्या तत्सुधया तृप्तमात्मदेहं प्रभावयेत्।
अनेन देवि योगेन जायते दिव्यदर्शनम् ।।४७।।

खेचरत्वं भवेत् सत्यं सर्वरोगक्षयस्तथा।
वचनं कालमृत्युश्च त्रैलोक्यभ्रमणं तथा ।। ४८ ।।

अणिमादिगुणोपेतां संसिद्धिं लभे (लभते) ध्रुवम् ।
योगीन्द्रत्वमाप्नोति गतिरव्याहता भवेत्।।४९।।

नवनागसहस्राणां बलेनं सहित (:) स्वयम्।
जायते शिववद् देवि सत्यं सत्यं मयोदितम् ।।५०।।

इडापिङ्गलयोर्मध्ये सुषुम्णा ज्योतिरूपिणी।
वर्णरूपगणैः साकं तेजस्तत्र निरामयम् ।।५१।।

सुषुम्णाभुजगाकाशे यत्तत्कुण्डलिनी परा।
गङ्गा च यमुना चैव इडापिङ्गलसंज्ञकै ।।५२।।

गङ्गायमुनयोर्मध्ये तां शक्तिं सन्निवेशयेत्।
ब्रह्मधावधि (ब्रह्मबोधावधि) शिवे परमामृतरुपिणी ।।५३।।

तन्मयो जायते सत्यं परमामृततनुं(परामृततनुः) स्वयम् ।
शिवधामगता शक्तिः परमेशास्पदं पदम् ।।५६।।

तद् वागतृप्तिसंतृप्ता परमानन्दरुपिता।
सिञ्चति योगिनो देह मायादतलमस्तकम् (?) ।।५५।।

सुधया शिशिरस्निग्धशीतं वा परमेश्वरी (?)।
पुनस्तेनैव मार्गेण प्रयातः स्वपदं शिवे ।।५६।।

एतद्रहः समाख्यातं योगं योगीन्द्रवन्दिते।
उत्सृज्य सर्वशास्त्राणि जपहोमादिकं च यत् ।।५७।।

धर्माधर्मविनिर्मुक्तो योगी योगं समभ्यसेत्।
रसनामुर्ध्वगां कृत्वा त्रिकुटेशं निवेशयेत् ।।५८।।

[47a] ब्रह्माण्डे ब्रह्मरेखाध्वो राजदन्तोर्ध्वमण्डले।
त्रिकूटं तं विजानीहि तत्र लिङ्गं समुज्वल(म्) ।।५९।।

कालकर्मविनिर्मुक्तं दुर्विज्ञेयं सुरैरपि।
इडायां रात्रिरुद्दिष्टा पिङ्गलायामह स्मृतः।।६०।।

चन्द्रादित्यौ स्थितौ देवि नित्यं रात्रिदिवात्मकौ ।
न दिवा पूजयेल्लिङ्गं रात्रौ न च महेश्वरि ।।६१।।

सर्वदा पूजयेल्लिङ्गं दिवा रात्रौ निरोधवाः(निरोधका) ।
अहोरात्रिमयं देवं कालकर्म-स्वभावजम् ।।६२।।

कालकर्मनिरोधेन कालमृत्युञ्जयं लभेत्।
कालकर्मविनिर्मुक्तं चिन्तयन्नात्मनस्तनु(म्) ।।६३।।

पूजयेद् भावपुष्पेण तर्पयेत् पंकजामृतैः।
एवं षण्मासयोगेन जायते ह्यजरामरः ।।६४।।

सर्वज्ञत्वं लभेत् सत्यं शिवसाम्यो निरामयः।
तालुमूले समावेश्य रसनामूर्ध्ववक्त्रकाम् ।।६५।।

तत्र जातं तु पिबन् सीत्कारेण शनैः शनैः।
प्रपिबेत् पवनं योगी निरालम्बि पदे शिवे ।।६६।।

मनः संयोज्य चोन्मन्या सहजं योगमाचरेत्।
अनेन योगी षण्मासाज् जायते ह्यजरामरः ।।६७।।

चिबुकं योजयेद् देवि षोडशस्वरमण्डले।
भ्रूमध्ये चक्षुणा मीनस्य (?) जिह्वामूर्ध्वं प्रसारयेत् ।।६८।।

संप्राप्य कुम्भकावस्थां इडापिङ्गलरोधनात्।
मूलशक्तिं समुद्बोध्य भित्वा षट्सरसीरुहान् ।।६९।।

तडितसहस्रसङ्काशां ब्रह्माण्डोदरमध्यगे।
धाम्नि शीतामृताम्भोधौ संन्निवेश्य चिरं वसेत्।।७०।।

यदा ब्रह्ममये धाम्नि योगी वसेत् लीलया।
तदा निर्जीवव(द्) देहं भावि स्फुरति तत्पदम् ।।७१।।

[47b] अनेन देवि योगेन दिनसप्तकमाचरेत्।
तदा तदा संभवति जरामरणवर्जितः ।।७२।।

मासमात्रप्रयोगेण जीवेद् आचन्द्रतारकम्।
यदा ब्रह्मपुरं भित्त्वा योगी ब्रजति लीलया ।।७३।।

तदाखि(ल)त्वमाप्नोति त्यक्त्वा देहमिमं शिवे।
न पुनः पिचे (पिबति) मातु (:) स्तनं (स्तन्यं)
संसारचक्रमा(त्) ।। ७४।।

तदा तु योगिनो वृद्धिस्त्यक्तं देहमिमं प्रिये।
तदा स्थिरासनो भूत्वा मूलशक्तिं समुज्च(ज्व)लाम् ।।७५।।

कोटिसूर्यप्रतीकाशां भावयेच् चिरमात्मवित्।
आपादतलपर्यन्तं प्रसृतं जीवमात्मनः ।।७६।।

संहृत्य क्रमयोगेन मूलाधारपदं नयेत् ।
तत्र कुण्डिलिनीशक्तिं संवर्त्तानलसंन्निभाम् ।।७७।।

जीवो नित्यं चेन्द्रियाणि ग्रसन्तीं चिन्तयेद् धिया ।
संप्राप्य कुम्भकावस्थां तडिद्वलयभास्वरम् ।।७८।।

मूलादुन्नीय देवेशि स्वाधिष्ठानपदं नयेत् ।
तत्र सजीवमखिलं ग्रसन्तीं चिन्तयेताम् ।।७९।।

तडित्कोटिप्रतीकाशां तस्माद् उन्नीय सत्वरम् ।
मणिपूरपदं प्राणं तत्र सूर्यंयदाचरेत् ।।८०।।

समुन्नीय पदस्थानाद् अनाहतं पदं नयेत् ।
तत्रस्थित्वा क्षणं देवि पूर्ववद् हि सती स्मरेत् ।।८१।।

उन्नीय च पुनः पद्मे षोडषरिति (षोडशारे) निवेशयेत् ।
तत्रापि चिन्तयेद् देवि पूर्वं तद् योगमात्मवित् ।।८२।।

तस्मादुन्नीय भ्रूमध्यं नीत्वा जीवं ग्रसेत्पुनः ।
ग्रस्तजीवां महाशक्तिं कोटिसूर्यसमप्रभाम् ।।८३।।

मनसा सह वागीशि भित्वा ब्रह्मर्गलं क्षणात् ।
परामृत महाम्भोधौ विश्वासं सम्यग् आचरेत् ।।८४।।

तत्रस्थं परमं देवि शिवं परमकारणम्।
शकृत्या सह समायोज्य तयोरैक्यं विभावयेत् ।।८५।।

[48a] यदि मोचितम्(मु)द्युक्तः कालं काल्विभागवित् ।
यावद् भजति तं कालं तावत्तत्र सुखं वशेत् (वसेत्) ।।८६।।

ब्रह्मद्वारार्गलस्य अधो देहे कालप्रयोजनम् ।
तस्यादर्धपदे (तस्मादूर्ध्वपदे) देवि न कालप्रयोजनम् ।।८७।।

यदा देव्याप्त (देव्याप्तं) न कालमतिक्रान्तं प्रविश्यति ।
तदा ब्रह्मार्गलं भित्त्वा शक्तिं मूलपदे नयेत् ।।८८।।

शक्तिं देहात्मसूत्रं तु स्वजीवं चेन्द्रियैः सह ।
तत्तत् कर्मणि संजोज्य (संयोज्य) स्वस्य देहं सुखं चरेत् ।।८९।।

अनेन देवि योगेन वञ्चयेत् कालमार्गणम् ।
यदि मानुष्यकं देहं त्यक्तुमिच्छा प्रवर्तते ।।९०।।

ततः परमसन्तुष्टो ब्रह्मस्थानं गतं शिवम् ।
शकृत्या संयोज्य निर्भिन्नव्योमब्रह्मशिलां विशेत् ।।९१।।

व्योमत्त्वं महाव्योम्नि वायुतत्त्वमथानिले ।
तेजस्तत्त्वं तथा तेजस्यामत्वं (?) जलमण्डले ।।९२।।

धरातत्त्वं धराभागे निराल (निश्चलं) वै मनः परे ।
व्योमादिगुणतत्त्वेषु स्वेन्द्रियाणि निवेशयेत् ।।९३।।

एवं सांसारिकं त्यत्त्कावा परतत्त्वावलम्बकः ।
अदृष्टः पञ्चभूताद्यैर्भित्त्वा सूर्यस्य मण्डलम् ।।९४।।

परतत्त्वे परे शान्ते शिवे लीने शिवायते ।
न कल्पकोटिसहस्रैः पुनरावर्तनं भवेत् ।।९५।।

अनुग्रहाय लोकानां यदि देहं न संत्यजेत् ।
प्रलयोते (प्रलयान्ते) तनुं त्यक्त्वा स्वात्मन्येव अवतिष्ठते ।।९६।।

इत्येषा खेचरीमुद्रा खेचराधिपतित्वदा ।
जन्ममृत्युजरारोगवलिपलितनाशिनी ।।९७।।

अनायासदृशी (अनया सदृशी) विद्या
क्वचिच् छास्त्रातरेन (छास्त्रान्तरे) नहि ।
खेचरीमेलनं देवि सुगुप्तं न प्रकाशयेत् ।।९९।।

[48b] तस्याः स्वाभ्यासयोगो(ऽ)यं तव स्नेहात् प्रकाशितः ।
मदिरा नाम या देवि सर्वयोगीन्द्र-वन्दिता ।।१००।।

गुरुवक्त्रोपसंलब्धां विद्या (याः) अंशतो(ऽ)पि च ।
खेचरी मेलनमादिश्च नित्यं सप्रेमचेतसः ।।१०१।।

न सिध्यति महायोगं मदिराराधनं विना ।
तत्प्रसादविहीनानां तन् निन्दापरचेतसाम् ।।१०२।।

पशोः पाशप्रबन्धस्य योगः क्लेशाय जायते ।
सर्वज्ञेन शिवेनोक्तां पूजां संत्यज्य मादिरीम् ।।१०३।।

युञ्जतः सततं देवि योगो नाशाय जायते ।
वारुण्या तर्पयेद् देवि सर्वलोकमयं शिवे ।।१०४।।

गौडी माध्वी च पैष्टी च तथा कादम्बरी वराः ।
कादम्बरी च द्रुमला (द्रुमजा) माध्वी मधुसमुद्भवा ।।१०५।।

पैष्टी पिष्टसमुद्भूताः गौडीक्षुरससंभवा ।
तासामेकतमां गृह्य तर्पयेत् सर्वदेवताः ।।१०६।।

असक्तासु (अशक्तस्तु) महापूजां यदि कर्तुं च साधकः ।
कुर्याद्धि द्रेकदानं (?) वा गुरुवाक्यावलम्बकः ।।१०७।।

एकबिन्दुप्रदानेन तृष्यन्ते कोटिदेवताः ।
तस्मात् सम्पूज्य युञ्जीत तत्प्रसाद - पवित्रितः ।।१०८।।

अन्यथा क्लेश एव स्यात् न सिद्धिर्जन्मकोटिसु ।
सर्वे सिद्ध्यन्ति मन्त्राश्च योगाश्च परमेश्वरि ।।१०९।।

सम्यक् पूजा प्रयोगेण मदिरानन्दचेतसः ।
असम्पूज्य पिवद् देवि मदिरां यः स पापभाक् ।।११०।

महाराधनशीलस्य मयैवा (मय्येवा)-सक्तचेतसः ।
तस्मात् सम्पूजयेद् देवि सर्वयोगाभिवृद्धये ।।१११।।

[49a] मदिरानन्दितो योगी योगं युञ्जीत नित्यदा ।
विजने जन्तूरहिते सर्वोपद्रववर्जिते ।।११२।।

मृद्धान (मृदासनं) समास्थाय स्वगुरूक्तप्रकारतः ।
सन्तर्प्य शिवमीशानं देवि देवींश्च सर्वशः ।।११३।।

तत् प्रसादेन लभते सम्यग् ज्ञानमखण्डितम् ।
एतद् योगं समारव्यातं किं भूयः श्रोतुमिच्छसि ।।११४।।

।।इति श्रीमत्स्येन्द्रसंहितायां षोडशः पटलः।।

।।सप्तदश पटलः।।

श्रीदेव्युवाच —

शम्भो सद्भावसंलभ्य जयचन्द्रार्धशेखरः ।
त्वया श्रीखेचरीविद्यासाधनं गुह्यमीरितम् ।।१।।

संसिद्धिः केन मार्गेण खेचरीमेलनं लभेत् ।
तन्मे ब्रूहि जगन्नाथ परमानन्दनन्दितम् ।।२।।

श्री भैरव उवाच —

शृणु गुह्यं महादेवि सर्वतन्त्रेषु गोपितम् ।
खेचरीमेलनं लोके महायोगीन्द्रसेवितम् ।।३।।

खेचरी नाम इयं विद्या सद्यः प्रत्ययकारिका ।
सर्वसिद्धिप्रदा देवि जरामरणनाशिनी ।।४।।

दार्छा (भेत्ता) ब्रह्मकपाटस्य पशूनां दूरमार्गगाः ।
असिद्धानामपि च यो योगीनां परमेश्वरि ।।५।।

ब्रह्मधाम परित्यह्य (परित्यज्य) आयाता नासिकापथम् ।
भित्वा ब्रह्मकपाटं तु यदा ध्रुवपदं व्रजेत् ।।६।।

तक्ष (तत्र)स्यात् परमानन्दं संविद्भावककारणम् ।
ज्ञानं तथा च विज्ञानं तत्प्रसादात् स्फुरत्यपि ।।७।।

एवं योगे क्रियायां च स्थिता सकलकामदा ।
चिद्रूपा कुञ्चिका नाम दुर्विज्ञेया सुरासुरैः ।।८।।

एवं कुण्डलिनीशक्तिरुर्धा (र्ऽरूर्ध्वा)- धो(ऽ)नेकधागता ।
तत्स्थे योगः पदस्थे हि अणिमादिप्रसाधकः ।।६।।

तानि स्थानानि वक्ष्यामि यथाग्रेषु च सिद्धिदा ।
मूलाधारं चतुः पत्री (चतुष्पत्रो) बिन्दुस्त्रिवलयान्वितः ।।१०।।

[49b] गमागमौ समोपेतौ आधाराख्यशिखिप्रभा ।
गुह्यं तं षट्दलं दीप्तं षट्बिन्दु परिकीर्तितम् ।।११।।

सप्तजाम्बूनदाभ्यासं(° नदाभास°) स्वाधिष्ठानं हि तद्भवेत् ।
नाभिमध्यगतं शुद्धं द्वादशारं शशिप्रभम् ।।१२।।

मणिपूरकविज्ञानमर्द्धचन्द्रस्थमध्यगम् ।
अनाहतदसारं (अनाहतानन्दसारं) ब्रह्मरन्ध्रातिगं सदा ।।१३।।

शुद्धं स्फटिकसंकाशं भावयेन् नादपूरकम् ।
षोडशारं महापद्मं त्रिकोणं कण्ठमाश्रितम् ।।१४।।

पूर्णचन्द्रनिभाकारं विशुद्धं मोक्षदायकम् ।
पञ्चकूटमहस्थानं विद्युत्कोटिसमप्रभम् ।।१५।।

मध्यदिनार्कसंकाशं भावयेद् बिन्दुरूपकम् ।
स तु नाना ततो मध्ये शक्तिर्व्योमप्रभेदिनी ।।१६।।

ज्वलन्ती पञ्चधा रन्ध्रे सेयमाज्ञा प्रकीर्तिताः ।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ।।१७।।

पृथिव्यादि निरंघ्राणि (?) पञ्चपञ्चकमेव च ।
तथा च कोष्टकाः पञ्च स्वाधिष्ठानादय (:) स्मृताः ।।१८।।

एतेषु स्थानभेदेषु पृथग्धानं (पृथग्ध्यानं) शिवोदितम् ।
तत्रैकमभिचाज्यस्य(तत्रैककम् चाभ्यस्य) योगीं स्यादजरामरः ।।१९।।

अभ्यासेनैव नश्यन्ति पापाः जन्मसहस्रजाः ।
मेलनात् शिवतां याति सुमहान् खेचराधिपः ।।२०।।

स्वतंत्रः सर्वलोकेषु गतिरव्याहता भवेत् ।
अविज्ञाय च यः कुर्यात् गुरूवाक्यामृतं विना ।।२१।।

भक्ष्याते (भक्ष्यते) सो(ऽ)चिराद् दिवि (देवि)
योगि (नी) भिर्न संशयः ।
य इदं परमं शास्त्रं ग्रन्थतश्चार्थतस्ततः ।।२२।।

[50a] गुरुवक्त्रात्तु लभ्येत परो (परां) सिद्धिमवाप्नुयात् ।
य इदं परमं गुह्यं खेचरीमेलकं ददेत् ।।२३।।

स एव हि गुरुर्देवि नान्यो(ऽ)स्ति परमेश्वरि ।
इदं गुह्यतमं शास्त्रं पशूनां य प्रदापयेत्।।२४।।

अपरीक्षितवृत्तस्य स शीघ्रं नश्यति प्रिये ।
बहुधा क्लिश्यमानाय भक्तयानंन्यचेतसे
(भक्तायाऽनन्यचेतसे) ।। २५

एकान्ते विजने स्थाने प्रवक्तव्यं विपश्चिता ।
व्याख्यानकाले कर्तव्या पूजाविधिरथाग्रतः ।।२६।।

कुलामृतैश्च मांसैश्च कस्तूरीचन्दनादिभिः ।
रक्तवस्त्रे समाधाय विद्यापुस्तकमादरात् ।।२७।।

पूजये(त्) पूर्वविधिना ततो व्याख्यानमाचरेत् ।
अथ वायव्यशक्तस्तु मानसेन कलामृतैः ।।२८।।

सन्तर्प्य पूज्य विजने ब्याख्यानं गुप्तमाचरेत् ।
(एकचित्त?) गतेनैव भावना (भावेना)राध्य पुस्तकम् ।।२९।।

श्रृणुयाद् विजने देशो तत् ज्ञे (तत्त्वज्ञो) युक्तो(ऽ)थवा प्रिये ।
पूर्वोक्तविधिना देवि स्वगुरूक्तप्रकारतः ।।३०।।

समभ्यस्य यथान्यायं द्वादश(द्वादशा)-ब्दमतन्द्रितः ।
पर्यटेत् पृथिवीमेनां यत्रस्थान (यत्रस्थो) मेलको गुरुः ।।३१।।

तं दृष्ट्वा सर्वभावेन समाराध्य प्रयत्नतः ।
आत्मनि(:)श्रेयस्करं तेनोक्तं सम्यगाचरेत् ।।३२।।

ज्ञानयुक्तं तु मातङ्गमपि कुर्याद् गुरुं प्रिये ।
ज्ञानविज्ञानहीनं तु षट्कर्मस्थमपि त्यजेत् ।।३३।।

यत्र यत्र विशिष्टार्थं तत्र तत्र समाश्रयेत् ।
यस्य हस्थो(हस्तो) - स्थितं दिव्यं विद्यापुस्तकमीश्वरि ।।३४।।

तस्य मूर्तिगतं देवि सकुलं ज्ञानसागरम् ।
यथाद्यो (?) ग्रन्थतश्चेदमर्थतश्च वदिष्यति ।।३५।।

[50b] अशेषेण जगद्धात्रि स एव परमो गुरुः ।
सर्वज्ञेन शिवेनोक्तं इदं जन्मार्वुदेरपि ।।३६।।

दुर्लभं शास्त्रसारन्तु दिव्यज्ञानप्रकाशकम् ।
द्वाविमौ पुरुषौ लोके सिद्धः साधक एव च ।।३७।।

अभ्यासेनैव सततं य सर्वः (सर्वं) परिवर्तते ।
अभिच्छुरात्मनः सिद्धिं स योगी साधक (:) स्मृतः ।।३८।।

सम्यगभ्यासं विज्ञाय यः समं मेलनं चरेत् ।
सर्वसाधारणत्वेन विकल्पकुटिलो
जितः (°कुटिलोज्भितः) ज्भिद।।३९।।

कर्त्ता भर्त्ता च संहर्ता नित्यतृप्तो निरामयः ।
पश्यत्यात्मा अविभेदेन जगतेतच् चराचरम् ।।४०।।

स योगी सर्वविहीमान् (सर्वविच्छ्रीमान्) सिद्ध इत्युच्यते बुधैः ।
साधको बहुजन्मान्ते प्रयाति परमं पदम् ।।४१।।

देवैः सुदुर्लभां सिद्धिं सिद्धो याति न संशयः ।
तस्मादभ्यस्य यत्नेन खेचरीमेलनं चरेत् ।।४२।।

मेलनादप्यनभ्यासी सर्वं लभति पार्वति ।
तस्मादभ्यासहीनो(ऽ)पि मेलनात् स्यादजरामरः ।।४३।।

यदा संमेलति गुरुः शिष्यं मेलनकर्मणि ।
संयोजयिष्यति शिवे तदेवं समुदाचरेत् ।।४४।।

एकान्ते विजने स्थाने पशुदृष्टिर-(दृष्टेर)-गोचरे ।
पूजायोग्यानि वस्तूनि साधयेत् परमेश्वरि ।।४५।।

सुस्निग्धे च सुसम्भृष्टे गोमयेनोषः पलेंयिते (गोमयेनोपलेपिते)
चारुवस्त्रवितानाग्रे (?) सर्वोपद्रववर्जिते ।।४६।।

वीरेणमकुर्पूर (वीरेणागरुकर्पूर) - लघुसिन्दूररेणुभिः ।
वृत्तषट्कोणावस्थारवृत्तभूवलयोज्वलम् ।।४७।।

कारयेन्मण्डलं देवि तत्रापि कलसं न्यसेत् ।
पूरयेद् दिव्यतोयेन रत्नगर्भं सवस्त्रकम् ।।४८।।

[51a] माल्यधूपसमायुक्तं दर्पणालङ्कृतं प्रिये ।
तत्र पञ्चमहारत्नान् न्यसेद विद्यां च पूर्ववत् ।।४९।।

तदग्रे (तदग्रे) देवि साधारे पात्रं पूर्णकलामृतैः ।
पूर्ववत् परिसंस्कृत्य पूर्वोक्तविधिनाचरेत् ।।५०।।

पूजावसाने देवेसि (देवेशि) तत्प्रसादपवित्रितम् ।
स्नापयेत् कलसेनाङ्गं परामृतधिया गुरः (गुरोः) ।।५१।।

बिना स्नानप्रसादाभ्यां कल्पानमयुतै (कल्पानामयुतै)रपि ।
न सिध्यति महेशानि खेचरीमेलकं प्रिये ।।५२।।

तस्मात् सर्वप्रयत्नेन त्प्रसाद ....सहाभिध (?) ।
सस्नानं दापयेद् विद्यां नान्यथा सिद्धिभाग् भवेत् ।।५३।।

स्नापयित्वा शिवं देवि योगस्थाने विशेषवित् ।
पञ्चाशतवर्णमालां च स्थले वा दर्पणे(ऽ)थवा ।।५४।।

यदे (पत्रे?) वा चन्दने देवि तत् लिखेन् न तु भूतले ।
शिष्यहस्तेन देवेशि तत्र पुष्पं प्रचोदयेत् ।।५५।।

यस्मिन् वर्णे विपतितं पुष्पं तद्वर्णपूर्वकम् ।
नाम चानन्दनाथान्तं दापयेद् गुरुमीश्वरि ।।५६।।

शक्तिमाम च (?) संप्रेक्ष्य परां वा तं प्रदापयेत् ।
पूर्वप्रसादसन्दग्धमहापातकसञ्चयः।।५७।।

पुनश्च कलासासेकान् (कलसासेकात्) परामृततनुर्भवेत् ।
भूयश्च नामग्रहणात् शिवसाम्यः प्रजायते ।।५८।।

एवं ऋृते (कृते) शिवे शिष्यो योग्यो मेलनकर्मणि ।
अन्यथा परमेशानि न देवान(न्द)कृद् भवेत् ।।५९।।

इति सिद्धतनुः सिद्धो यद् यद्भावमुपासते ।
तत्तत् फलं च प्रत्यक्षं भविष्यति न शंसयः (संशयः) ।।६०।।

।। इति श्रीमत्स्येन्द्रसंहितायां सप्तदशः पटलः ।।

।।अष्टादशः पटलः।।

श्रीभैरव उवाच —

इति सर्वज्ञपाशाद्यस्तीर्णः संसारसागरात् ।
भुञ्जीत स्वेच्छया भोगान् स्वेच्छया योगमभ्यसेत् ।।१।।

[51b] उपदीयः प्रयो (उपादेयः प्रियो) यस्मात् कौलिके प्रियमेलकः ।
अतः कुर्यादनुष्ठानं प्रमाण ....वेमेव (?) वा ।।२।।

अत्यन्तविजने स्थाने सर्वोपद्रववर्जिते ।
नितान्तं मनसो रम्ये हृद्यधूपसुगन्धिते ।।३।।

विकीर्णपुष्पप्रकरसिन्दूरादिसुरञ्जिते ।
गुरुमण्डलकं ज्ञात्वा भक्तिमान् योगमभ्यसेत् ।। ४ ।।

स्थिरमासनमासीनः शकली (?) - कृतविग्रहः ।
जितश्वासो जितमना जितकर्मा जितेन्द्रियः ।। ५ ।।

नियोज्यं घण्टिकारंध्रे ....
अधस्ताच् चिन्तयेच् चक्रमाक्रान्तधारमण्डलम् ।।६।।

तत्र मध्ये समो दीप्तां मूलशक्तिं विभावयेत् ।
प्राणान्निरोध्योर्ध्वमुखं नयेद् भित्त्वा षडाम्बुजान् ।।७।।

एकीभूता हि नादाख्या चक्रभेदक्रमेण च ।
तडिद्वलयसङ्काशां स्फुरत् किरणरूपिणीम् ।।८।।

चिन्ह्या च निरालम्बे शून्ये तेजोमये परे ।
ब्रह्मद्वारस्य गर्भे तु विसर्गाख्ये विलीयते ।।९।।

ततो रसनयोद्भेद्य प्रविशेद् ब्रह्मणः पदम् ।
तस्मिन् कुलामृतं दिव्यं पीत्वा भूयो विशेत् कुलम् ।।१०।।

तेन प्रासितमात्रेण (ग्रासितमात्रेण?) परां सिद्धिमवाप्नुयात् ।
योगमूले रजके स्थाने भूमस् तस्मात् समुत्थितः ।। ११ ।।

पृथिव्याधारसंकोचात् एकोच्चारक्रमेण तु।
एतद्वामीश्वरीवीजं (वामेश्वरी बीजं) रहस्यं सम्प्रकाशितम् ।।१२।।

व्यारव्याता खेचरी मुद्रा तस्या बन्धो(ऽ)यमेव हि।
एतस्या बन्धमात्रेण भाग्यहीनो(ऽ)पि सिद्धयति ।।१३।।

मेलकं (मेलकात्) खेचरीणां च दिव्यवेषो(ऽ)भिजायते ।
अमुना सम्प्रदानेन यत्र यत्र विलीयते ।।१४।।

[52 a] तत्र तत्र परानन्दरूपमेव प्रकाशते ।
सर्वशास्त्रार्थवेत्ता सौभाग्यं परमं तथा ।।१५।।

काव्यं च सर्वभाषाभिः सालङ्कारपदोज्ज्वलम्।
करोति लीलया योगी रुद्रशक्तिप्रभावतः ।।१६।।

अनेनैव प्रयोगेण सर्वमात्राः (?) स्फुरन्ति हि ।
आणवाः शाम्भवाः शाक्ताः ये के उच्चरति (?) प्रिये ।।१७।।

मणिपूरे लयाद् वश्यं शान्तिश्रीपुष्टितुष्टयः ।
आकर्षणं पुरक्षोभो (?) भवन्त्येव हि सिद्धयः ।।१८।।

अनाहते तु संल्लीनो योगी ग्रन्थिविभेदनात्।
गिरीणां पातनं देवि कुर्यात् मृत्युश्च (मृत्योश्च) वञ्चनाम् ।।१९।।

विशुद्धे अत्यमृताधारे योगस्तु स्याद्संशयः।
क्षुत्-तृषादारुनिर्मुक्तो जरारोगविवर्जितः ।।२०।।

आज्ञास्थानगतो योगी त्रैलोक्यमपि पश्यति।
त्रिकालज्ञः स्वयं कर्त्ता स एव परमेश्वरः ।।२१।।

अतीतं वेत्ति नाभिस्थो वर्त्तमानं हृदि स्थितम्।
आज्ञास्थानगतो योगी सर्वं जानाति सर्वदा ।।२२।।

अधुना वा उन्मनीभावः परतत्त्वोपलब्धये।
पारम्पर्यक्रमायातो ब्रह्माण्डोदरमध्यगः ।।२३।।

यल् लिङ्गाधारमध्यस्थं मध्ये शक्त्यङ्कुरान्वितम्।
यत्र मात्रं प्रमाणं तु त्रिकोणाकृतिरुत्तमा ।।२४।।

निष्कलं यत्परं तेजः परस्पर(सु)संस्थितम् ।
जनमणीन्द्रियं (?) यद्वत् विस्फुरश्चैव दृश्यते ।।२५।।

तथाकृतिर्भवेत् तस्य मीलनोन्मीलनानि च ।
प्रथमं भेदयेच चक्रं नाभिजं नाडिभिर्युतम् ।।२५।।

तदूर्ध्वे हृदयावस्थं चक्रं चै (वै) कुलसंज्ञकम्।
हृच्चकं भेदयेत् पश्चात् कठं चक्रं (कंठचक्रं) ततः शनैः ।।२७।।

[52 b] तदूर्ध्वे लम्बिकां भेद्य नासाग्रं तु ततो नयेत।
नासाग्रे श्वाससंभिन्नं भ्रूमध्ये सन्निवेशयेत् ।।२८।।

श्वासेन सहितं वीजं तेजोरूपं ललाटके।
गत्वा लक्षं (लक्ष्यं) ललाटस्य प्रविशेत् सूर्यसंनिभम् ।।२९।।

कुञ्चिकाग्रं ततः सूक्ष्मा.......... णु च सूक्ष्मकम्।
उद्घाटयेत् ततो द्वारं शिवद्वारार्गलं महत् ।।३०।।

बिन्दुद्वारार्गलं भित्त्वा दुर्भेद्यं त्रिदशैरपि।
ब्रह्माण्डोद्रमित्युक्तं योगिनी सिद्धसेवितम् ।।३१।।

तदेतद् अङ्गुलोत्सेधं कुलाये (?) संव्यवस्थितम्।
प्रवेशात् स्पर्शनं तत्र बालानामिव जायते ।।३२।।

शक्तितत्त्वावबोधो हि विज्ञानं सिद्धिसाधनम्।
परतत्त्वावबोधश्च ज्ञानमोहप्रसाधनम् ।।३३।।

भुक्तिमुक्त्योर्द्वयोर्हेतुं परमानन्दतां गतः ।
जीवन्मुक्तिमिवाप्नोति वत्सरार्धान् न संशयः ।।३४।।

प्राप्तद्वादशकेनैव शिवसाम्यबलं प्रिये।
सर्वार्थकृत्यं सूक्ष्मत्वं सर्वज्ञत्वं विशुद्धता ।।३५।।

नित्यानन्दस्वभावत्वं सर्वव्याप्तिमेव च ।
अणिमा लघिमा प्राप्तिः प्राकाम्यं गरिमा तथा ।।३६।

ईशित्वं च वशित्वं च यच्च कामावसायिता।
स्यान्महासिद्धयस्त्वेता अष्टौ विज्ञानयोनयः ।।३७।।

योगिनः संप्रवर्तन्ते वत्सरात् परमेश्वरि।
अथातः संप्रवक्ष्यामि साधनं परमं प्रिये ।।३८।।

विधिनानुत्थितं पूर्वं मया च बरवर्णिनि।
अन्येषां देवि देवानां ब्रह्मादीनां च दुर्लभम् ।।३९।।

बिन्दुजीवजलाक्रान्तं वर्तुलं चन्द्रमण्डलम्।
बिन्दुप्राणानिलाक्रान्तं त्रिकोणं वह्निमण्डलम् ।।४०।।

[53a] आपूर्य वामया नाड्या (द्) मुञ्चे (नासिक्या?) दक्षिणयाबहिः।
पुनर्दक्षिणया(ऽऽ)पूर्य बहुशो वामया त्यजेत् ।।४१।।

एवं विशुद्धनाडीक (:) कुम्भकामां (कुम्भकेन) शतं शतम्।
कुर्याद् बहिः हंसेन सहजेनान्तरस्थितम् ।।४२।।

स पश्यति जगत्कीर्णं तेजसः परमाणुभिः।
दृष्टेति प्रत्ययं कुर्यात् प्रत्येकमयुतं यदा ।।४३।।

तदा पश्यति नासाग्रे हृदयेन्दोज्ज्वलं सहः।
तयोः संचिन्तयेद् ऐक्यं तथात्मानं स पश्यति ।।४।।

अतिमग्नं मनः कुर्यात् प्रत्येकमयुतं यदा।
तस्मिन् पर्युष्टकात्मके..................
ततः स प्रियसंगत्या द्रुतामप्य (?) दीप्यति ।।४५।।

शक्तिबन्धकप्रयोगेण सप्तरात्रं निरोधकः।
कोदण्डद्वयमध्यस्थं बिन्दुनादेन भेदयेत् ।।४६।।

एवमभ्यसतस्तस्य प्रत्ययः संप्रजायते।
याममात्रा ध्रुवं त्यक्ता (?) गमने भव(ति) स्थितः ।।४७।।

द्वादशान्ते दिनार्धेन दृष्ट्वा साक्षान्महेश्वरम्
सम्प्राप्य प्रियसाङ्गत्यं शिवसायुज्यमप्नुयात् ।।४८।।

सुख(मा)सनासीनः सकलीकृतविग्रहः।
किञ्चिदभ्युन्नतोरस्को मयूराञ्चितमस्तकः ।।४९।।

विस्रस्तां सः स्थिरो भूत्वा रसनां घटिकाबिले
संयोज्य परमेशानि ध्यानं कुर्याज् जितेन्द्रयः ।।५०।।

अत्यन्तं निपुणां कुर्यात् सुषुम्णान्तर्गतं मनः।
शक्तिक्षोभान्ततस्तस्य परो(ऽ)भिव्यज्यते ध्वनिः ।।५१।।

नदेव सद संबीजं तत्र संयोजयेन् मनः ।
क्षणात् क्षौणीं परित्यज्य गगने भवति स्थिरः ।।५२।।

मूहूर्त्ताद्वीक्षते सर्वं तेजमयमिदं जगत्।
याममात्रं नदा तेजस्तदेव परिपश्यति ।।५३।।

[53b] तदा तस्य निवर्तन्ते निखिलाश्चित्तवृत्तयः।
यामलं यमसङ्कल्पो यदा स्थाणुवद् आस्थितः।।५४।।

यदा ब्रह्माण्डभाण्डस्य सर्वं प्रत्यक्षमीक्षसे (°मीक्षते?)।
अहोरात्रेण सर्वाणि साक्षात् तत्त्वानि पश्यति ।।५५।।

तद्रुपःपश्यति परिषतः (परितः) तदाऽसौ जायते शिवः।
नियोज्य घन्टिकारन्ध्रे रसनां निश्चलात्मिकाम् ।।५६।।

भ्रूमध्ये चक्ष्ण....... (चक्षुयुगलं) स्थिरं कृत्वा मनोहृदि ।
क्षीरोदार्णवनिमग्नं पद्मद्वये पुटीकृतम् ।।५७।।

पिबन्तं ब्रह्मरन्ध्रेण क्षीरधारामृतं हिमम्।
रोमकूपैर्विनिर्गत्य कोटिशः क्षीरबिन्दुभिः ।।५८।।

अमोघपाण्डुरन्तस्थमिवात्मानं विचिन्तयेत्।
अजरामरतामेति मासमात्रा(न्) न संशयः ।।५९।।

मासावधि महेशानि योगमेकं शिवोदितम्।
दिने दिने द्वयामान्तं (द्वियामान्तं) यामान्तं वा समुच्चरेत् ।। ६०।।

एकेनैव तु योगेन भुवनान्तमनुव्रजेत्।
द्वितीयेन तु योगेन सप्तद्वीपावलिं व्रजेत्।।६१।।

तृतीयेन तु योगेन शिवलोके महीयते।
अतीत्य सकलान् लोकान् प्रथाभोगान्यः
(पृथग्भोगानि) भुज्यच।। ६२।।

शरीराय महायोगी चन्द्रद्वीपे सुखं वसेत्।
श्रीदेव्युवाच -
अक्षयं वाचकं लोकं वद देव महेश्वर ।।६३।।

(श्री ईश्वर उवाच)—

शिवपूर्वं मया ख्यातं किं न बुध्यसि पार्वति।
त्रैलोक्यं ज्ञायते सर्वं सहस्रयुगपर्यये ।।६७।।

कल्पारव्यं ब्रह्मणस्स्थानं वैकुण्ठं चैव वैष्णवम्।
कैलाशं रुद्रसंस्थानं क्षीयते च महाक्षये ।।६८।।

अक्षयं चन्द्रद्वीपं तु यत्र देवी कुलनंविका (कुलाम्बिका)।
तिष्ठते (अ)त्र मया सार्धं सत्यं सत्यं महातपे ।।६६।।

[54a] योगिन्यस्तत्र या देवी सिद्धाश्च वरवर्णिनि ।
इच्छारूपधरा सर्वे सर्वे चामोक्षशक्तयः (चामोघशक्तयः) ।।६७।।

स्वतन्त्रा(श्च) स्वरूपाश्च सर्वे कुब्जेश्वरप्रभाः ।
किमत्र बहुनोक्तेन जल्पितेन पुनः पुनः ।।६८।।

क्षपयात्त(द्) विहीनं तु चन्द्रद्वीपं वरानने।
तत्क्षये यौवनान्दः क्रीडते स्वेच्छया प्रिये ।।६९।।

कल्पकोटि प्रातैस्तस्य (°शतस्तस्य) क्षयो नैव प्रजायते।
न च सांसारिका व्याप्तिः स्वस्य भूयः प्रवर्तते ।।७०।।

पशुमार्गस्थितो नित्यं योनियोन्यन्तरं व्रजेत्।
तस्मात् सर्वप्रयत्नेन गुरुं तोष्य महेश्वरि ।।७१।।

प्रबोधव्यमिदं शास्त्रं संसारं तर्त्तुमिच्छता।
येन सिद्धिमवाप्नोति सत्यं सत्यं न संशयः ।। ७२।।

।। इति श्रीमत्स्येन्द्रसंहितायाम अष्टादशः पटलः ।।

।एकोनविंशः पटलः । ।

ईश्वर उवाच —

अकृत(अ)भ्यासयुक्तानां योगीनां सिद्धिमिच्छताम् ।
ध्यानयोगं प्रवक्ष्यामि जरा-मृत्यु-गदापहम् । ।१ । ।

अकलङ्कोज्वलत् शीतकिरणांभोदरस्थितम् (?)
शरीरं चिन्तयेन् मासाद् वलीपलितनाशनम् । ।२ । ।

शुद्धेन्दुविम्बहृन्मध्ये श्रवन्तममृतं स्मरेत् ।
अमृतेन स्वकं देहमापादतलमस्तकम् । ।३ । ।

स्नाप्यमानं स्मरेद् अङ्गं तर्पयेत् सुधया तथा ।
तदर्धमात्रा ....स्वं सौकुमार्यं गदक्षयम् । ।४ । ।

वलीपलितनाशश्च भविष्यति सुरार्च्चिते ।
कञ्जनाशाद् अधोदेशे करंधादूर्ध्वमेव च । ।५ । ।

पूवोक्तमण्डलौ शीतसुधावृष्टिसमन्वितौ ।
मूलबीजौज्वलत् शीतसुधावृष्टिविनिर्गतैः । ।६ । ।

सुधासागरसंल्लीनां भसरन्तः(?) विभावयेत् ।
अन्तरङ्गमशेषं तु ब्रह्मरन्ध्रेन्दुनिर्गतैः । ।७ । ।

[54b] परामृतैर्ब्रह्मरन्ध्रा नाडीविलनिवेशितैः ।
तर्पयेदात्मनो बीजं देवताश्च शिवे धिया । ।८ । ।

अन्तरङ्गमशेषं तु तत्सुधावृष्टिपूरितम् ।
परिभाष्य सलोमाखा (?) मार्गकोटिविनिर्गतैः । ।९ । ।

सुधावृष्टिभिरेकं च बाह्याभ्यन्तरयोः स्मरेत् ।
तत्र (तन्) मध्ये समुल्लीनमात्मदेहं तदात्मकम् । ।१० ।

तर्पयेदात्मसुधया ब्रह्माण्डमखिलं शिवे ।
तत्सुधातृप्तिसन्तृप्तं परमानन्दधीमयम् ।।११।।

ब्रह्माण्डमखिलं चेदं आत्मदेहं विचिन्तयेत् ।
वेष्टयेत् सुधया देवि श्रियः सुस्निग्धशीतया ।।१२।।

अनेन देवि योगेन षण्मासाद् अजरामरः ।
लोहितं नवमं वर्णं सबिन्दुममृतात्मकम् ।।१३।।

नेत्रयोः परिसंचिन्त्य तत्सुधावृष्टिरश्मिभिः ।
ब्रह्माण्डमखिलं ध्यायेद् आत्मदेहं समर्पितम् ।।१४।।

त्रिवर्षध्यानयोगेन निर्विकल्पेन चेतसा ।
सप्तसप्तान्तलोकानि सप्तजन्म च दृश्यते ।।१५।।

पयः पयोमयाम्भोधौ लीनमात्मकलेवरम् ।
नित्यं चिन्तयतो वर्षात् स्याद् वलीपलितक्षयः ।।१६।।

ब्रह्मरन्ध्रामृताधारस्रवत् परसुधामृतैः ।
संसिच्यमानं षण्मासात् ध्यायन् देहं जरां जयेत् ।।१७।।

स्वदेहं चन्द्रसंकाशं अकलङ्कं सुधामयम् ।
ध्यायन् वर्षार्धतो योगी वलीपलित स्र (?) भवेत् ।।१८।।

सप्तचन्द्रसमो विवात् (विद्यात् ?) सकलङ्कामृतप्लुताम् ।
मूलादिब्रह्मरन्ध्रान्तं षट्पद्मेषु प्रभावयेत् ।।१९।।

वेदषदलसूर्येन्दु (?) कला द्विशतसंख्यया ।
पत्रैरक्षरसंलीनैरमृतकैर्वृतेषु (?) च ।।२०।।

[55a] एकत्र चिन्तयेत् तेषां मण्डलानामनुक्रमात् ।
अवच्छिन्नवदाधाराद (अवच्छिन्नधारावद्)
ब्रह्माण्डावधि पार्वति।।२१।

प्रज्वलत् कोटिचन्द्राभं आत्मदेहं तदात्मकम् ।
चिन्तयेदमृतासिक्तां योगी योगप्रसिद्धये ।।२२।।

षण्मासाद् वलिशौत्त्यादीन् (वलिपलितादीन् ?) नाशयेच् च गदान् अपि।
वांच्छात्यंतर्गता (?) यान्ति दुःखान् मुच्येत वै विषात् ।।२३।।

स(मा)त् सर्वज्ञताप्राप्तिरष्टाद् ईश्वरसंन्निभः ।
खेचरत्वं भवेद् देवि अणिमादिप्रपूजितम् ।।२४।।

विभिद्य योगिनी द्वारं वागीश्वर्या सुखासनः ।
कुम्भकावधि संजाप्य गमागमविभेदतः ।।२५।।

षण्मासाद् वलिपलित्वं नाशयेद् वत्सरत्रयात् ।
सर्वज्ञगुणसंतृप्तो द्वादशाब्दाद् हि प्रभुः ।
जरामृत्युगदैस्त्यक्तो भविष्यति न संशयः ।।२६।।

।।इति श्रीमत्स्येन्द्रसंहितायामेकोनविंशः पटलः।।

।।विंशः पटलः।।

कार्मुकद्वयमध्यस्थं मैहिरं (?) मंण्डलं प्रिये ।
ध्यायेन् मासावधि तदा रोगयुग्मक्षयं नयेत् ।।१।।

षण्मासाद् इन्द्रसाम्यः स्यात् अब्दाद् विणु (विष्णु) समो भवेत् ।
षड्वर्षाद् रुद्रसाम्यः स्यात् दशाब्दाद् अतिप्रभ (अतिसंप्रभः) ।।२।।

जायते नियतात्मा चेत् सत्यं सूर्यानुभावनम् ।
..........रक्तामृतपरिप्लुतम् ।।३।।

ध्यायन् वर्षार्धमात्रेण जायते ह्यजरामरः ।
मूलाधारे स्मरेद् देवि ज्वलन्तं रविमण्डलम् ।।४।।

तत्प्रभापटलं व्याप्तं शरीरं परिचिन्तयेत् ।
-देह ब्रह्मरन्ध्रे च ध्यायेद् हत्कमले(ऽ)पि च ।।५।।

मूले बिम्वे च च्छद्विवं (?) ब्रह्मरन्ध्रगतं तथा ।
अन्योन्यप्रभयाश्लिष्टान् शरैरेकस्रमात् (°क्रमात्) स्मरेत् ।।६।।

तन्मयं चिन्तयेद् देहे हियमांतं (ह्रियामान्तं) दिने दिने ।
षण्मासादणिमादीनाम् आधिपत्यम् अवाप्नुयात् ।।७।।

[55b] सर्वज्ञत्वं च लभते त्रिवर्षात् सूर्यसन्निभः ।
त.....वीतः स्मरेज्जीवं ज्वलद् दीप्तशिखाकृतिम् ।। ८ ।।

तृड्वाधवलिपालित्यमृत्युव्याधिभयं हरेत् ।
वर्षात् सर्वज्ञको भूत्वा वसेद् योमाकंणोर्ध्वके (?)।।९।।

सर्वामरशिरोरंघ्रदन्तांघ्रिद्वयपङ्कजः ।
सर्वगुणसम्पूर्णः सपिण्डो भवति प्रिये ।।१०।।

सहस्रकिरणान्तस्थम् आत्मानं सुस्थिरं स्मरेत् ।
ब्रह्मरन्ध्रपरं विम्बं भावयन् निर्विकल्पधीः ।।११।।

तद् रश्मिजालैः संच्छिन्नं देहमीश्वरि भावयेत् ।
ताभ्यामावेष्टितं देहं तेजरूपं वरानने ।।१२।।

दीप्तं दीप्तशिखाकारं बिम्बद्वयपुटीकृतम् ।
दुभिधि-तेजोन्दुगतं (?) भावयेत् कुंभकावधि ।।१३।।

ब्रह्मद्वारार्गलं भित्त्वा सुखिरोर्ध्व(सुषिरोर्ध्व)मुखेन च ।
शीतलामृतकल्लोलधारावृष्टिकुलामृतम् ।।१४।।

पीत्वा पीत्वार्करन्ध्रेण तत्सुधातृप्तिमोदितम् ।
चिन्तयेद् आत्मनो रूपं ज्योतिर्लिङ्गवद् आस्थितम् ।।१५।।

तदण्डाभ्यन्तरं सर्वे अमृतपूरितं (सर्वममृतापूरितं) स्मरेत् ।
तत्र मध्यगतो योगी गन्धाख्यगुणपूरितम् ।।१६।।

सर्वाधारमशेषं तु धारातन्त्वं (धरातत्त्वं) न विस्मरेत् ।
वाण्यांतसुगणाधारा (?) जलतत्त्वमशेषकम् ।।१७।।

तथा रूपगुणोदारं तेजस्तत्त्वमरोषकम् ।
नेत्रत्रयेषु सञ्चिन्त्य स्पर्शाख्यगुणपूरितम् ।।१८।।

वायुतत्त्वमशेषं तु श्वासमात्रं स्मरेच्छिवे ।
शब्दाख्यगुणसंजुष्टव्योमतत्त्वमशेषकम् ।।१९।।

श्रुतिस्थाने स्मरेद् योगी सशनैर्हत्य बाह्यकान् ।
ज्वालाण्डमध्यसंल्लीनं देहं विश्वमयं स्मरेत् ।।२०।।

[56a] स्वदेहमध्यसंल्लीनं ब्रह्माण्डमिदमव्ययम् ।
लयादिप्रलयान्तं च ग्रसेत् कालं च लीलया ।।२१।।

एकीभावेन सुदृढं बद्ध्वा पद्मासनं स्मरेत् ।
चिन्तयेत्कालकलुषैर्मुक्तदेहं निरामयम् ।।२२।।

तदा तद् दण्डमीशानि स्मरेन् सुश्विर (?) वर्जितम् ।
तदा कालभयं ग्रस्त्वा शिववस्त्वेच्छया (शिववत् स्वेच्छया)
वसेत् ।। २३।।

अनेन देवि ध्यानेन वञ्चयेत्कालमागतम् ।
पृथिव्यादीनि तत्त्वानि स्वीकृत्वा (स्वीकृत्य) आस्ते
(स्यान्) निरामयः ।।२४।।

ध्यानस्यास्य समासेन फलं च श्रृणु पार्वति ।
स्फोटयेत्सैल (स्फोटयेच्छैल)वृक्षादीन् शोषयेज्
जलधीश्वरान् ।। २५।।

करोति लीलया काग्नि (चाग्नि)जलानिलनिवारणम् ।
शब्दतत्त्वं जपेद् योगी जरामरणवर्जितः ।।२६।।

त्रिकालज्ञ (:) स्वयं कर्त्रा सर्वव्याधित्वमाप्नुयात्।
मृतकोत्थापनं देवि दग्धसञ्जीवनं महत् ।।२७।।

सृष्टिस्थितिलयाधीशः सर्वत्र समदर्शनः
परकायप्रवेशं च (परकायप्रवेशश्च) खेचरत्वं विशुद्धता ।।२८।।

क्षुत्तृषादाहनिर्मुक्तो स्वो ....छया वशेत् ?।
अप्रमेयबलो योगी दुर्विज्ञेयमति (:) प्रभो (प्रभुः) ।।२६।।

षण्मासा(द्) ध्यानयोगेन नित्ययुक्तेन पार्वति ।
सत्यं सत्यं पुनः सत्यं सत्यं सत्यं न संशयः ।
महाक्षयेष्वपि च वै क्षयं नैव प्रजायते ।।३०।।

इत्थं सहत्य(संहत)सर्वचित्रविषयस्याशेषविश्वात्मनः,
संविद् भावमणै (भावमणौ) सकारणमहायोगे चिरं तिष्ठतः ।
मेरौ सर्ववदर्णवे चुलकवत् खद्योत(व)द्भास्करे,
ब्रह्माण्डवदहोनि (?)..................कौतुकं योगिनः ।।३१।।

।।इति श्रीमत्स्येन्द्रसंहितायां विंशः पटलः।।